॥ ओ३म् ॥

पवनः पवतामस्मि रामः
शस्त्रभृतामहम्।
झषाणां मकरश्चास्मि
स्रोतसामस्मि जाह्नवी॥

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

सत्यनिष्ठा जयेल्लेखनी निर्भया

Posting Date.:
4-5, 19-20 of Every Month

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥

रामो राजमणिःसदा विजयते
रामं रमेशं भजे।
रामेणाभिहतानिशाचरचमू
रामाय तस्मै नमः
रामान्नास्ति परायणं परतरं
रामस्य दासोस्म्यहं।
रामे चित्तलयः सदा भवतु
मे भो राम! मामुद्धर॥

卐 वर्षम्-१३ 卐 अंकः-१४ (३०२) नवदेहली 卐 १६ जनवरीमासः २०२४तः ३१ जनवरीमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-१६

## भगवच्छ्रीरामचन्द्रविशेषाङ्कः

राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम -वरानने॥

# शताब्दीप्रतीक्षानन्तरमयोध्यायां भगवच्छ्रीरामचन्द्रस्य मन्दिरस्य स्थापना स्वप्न-साकारवत्

-धीरजमैठाणीः

अयोध्यानगरम्। पञ्चशताब्द्याः प्रतीक्षानन्तरम् आगामिनि जनवरीमासीये 22 तमे दिनाङ्के अयोध्यायां निर्मीयमाने राममंदिरे भगवतो रामस्य बालस्वरूपप्रतिमायाः प्राणप्रतिष्ठा विद्यते। अस्य भव्यम् आयोजनम् उद्दिश्य अयोध्यायां सञ्चलति। रामजन्मभूमिमंदिरसमितेः अनुसारं समस्तायाः अनुष्ठान-पूजा-अर्चनायाः रामानंदीसंप्रदायपरंपरायाः अनुसारं करिष्यते। भारतीयसनातनपरंपरायाः रामः सामूहिकतायाः समस्तायाः आदर्शभूतः। अतएव तस्य मंदिरेऽपि अस्या भावनायाः प्रतिबिम्बं लक्ष्यते। अयोध्यारामस्य जन्मस्थली अतः तत्पूजा अयोध्यायां बालरूपेण भवति। गर्भगृहे भगवद्रामस्य प्रतिमा तद् बालस्वरूपेण रामललारूपेण स्थापयिष्यते। प्रथमतले राममंडपं निर्मास्यते। यत्र भगवान् रामः मातासीतया भात्रा लक्ष्मणेन सह रामभक्तः हनुमान् अपि सुशोभिष्यते। श्रीरामजन्मभूमिसमितेः महासचिवः चंपतरायः कथितवान् रामललाप्राणप्रतिष्ठा पूजा जनवरीमासस्य 22 तमे दिनाङ्के मध्याह्नोत्तरम् 12:20 तः 1:00 यावत् सम्पत्स्यते। उल्लेखनीयं यत् कर्नाटकस्य प्रसिद्धयुवमूर्तिकारः अरुणयोगीराजः निर्मितस्य रामस्य बालमूर्तेः श्यामलवर्णीयायाः चयनं प्राणप्रतिष्ठायै भविष्यति। 18 तमे दिनाङ्के मूर्तिः गर्भगृहे स्थापयिष्यते। मूर्तेः जलं, अन्नं, शय्या इत्येते अधिवासाः कारयिष्यन्ते। प्रधानमंत्रीनरेंद्रमोदी, सरसंघचालकः मोहनभागवतः, मुख्यमंत्री आदित्यनाथयोगी गर्भगृहेउपस्थास्यन्ति। तत्पश्चात् 20-21 दिनाङ्कयोः प्राणप्रतिष्ठायै दर्शनं न भविष्यति। तेनोक्तं प्राणप्रतिष्ठायाः दिनं समग्रदेशस्य मंदिरेषु भजनकीर्तनेन सह पटले प्राणप्रतिष्ठा कार्यक्रमः दर्शयिष्यते। उल्लेखनीयं यत् अयं भव्यकार्यक्रमः विश्वस्य 135 संख्यकेषु राष्ट्रेषु दर्शयिष्यते। यद्यपि 55 देशस्य राम भक्ताः श्रद्धालवः अयोध्यां समागताः। महासचिवः चंपतरायः कथितवान् भगवतो रामस्य बालमूर्तेः अभिषेकः सर्वासां नदीनां जलेन भविष्यति। अनुष्ठानेऽस्मिन् 121 आचार्याः भविष्यन्ति। अनुष्ठान-संयोजकः गणेश्वरशास्त्री द्रविडः प्रमुखः आचार्यः श्री लक्ष्मीकांतदीक्षितः च। श्रीरामजन्मभूमिमंदिरप्रांगणप्राणप्रतिष्ठायाः साक्षीभवितुं देशस्य आध्यात्मिकक्षेत्रेण धार्मिकक्षेत्रेण, संप्रदायानाम्, उपासनापद्धतिभिः च संबद्धाः अखाडा इत्येषाम् आचार्याः 150 तः अधिकपरंपराणां सद्भिः, महामंडलेश्वरैश्च सह 50 तः अधिकाः आदिवासिभिः जनजातीयपरंपराभिः संपृक्तविशिष्ट जनाः अपि थास्यन्ति। प्राणप्रतिष्ठा अनुष्ठाने मुख्ययजमानस्य भूमिकां निर्वक्ष्यति प्रधानमंत्री नरेंद्रमोदी महाराष्ट्रस्य नासिके विधिपूर्वक-पूजा-अर्चनां कृत्वा पंचवटी धाम्नः 11 दिवसीयं कठिनं यमं अनुष्ठानम् आरब्धवान्, यस्य पालन-प्राण-प्रतिष्ठापर्यन्तं करिष्यति। ते नियमाः शास्त्रे वर्णिताः। तेन एकेन संदेशमाध्यमेन संदिष्टं यत् देशस्य140 कोटिमितानां जनानां प्रतिनिधिरूपेण अवसरस्यास्य साक्षी भविष्यामि। प्रधानमंत्री कथितवान् यत् सः एकस्याः भिन्नायाः भावभक्तेः अनुभूतिं कुर्वन्नस्ति। नूनमेव एषः उपक्रमः समस्तरामभक्तेभ्यः विशिष्टं विद्यते।



उल्लेखनीयं यत् राममंदिरस्य निर्माणारंभं 5 अगस्त 2020 तमे दिनाङ्के प्रधानमंत्री नरेंद्रमोदी सर्वसंचालकः मोहनभागवत च भूमिपूजनेन अकुर्वाताम्। त्रिदिवसीयात् वैदिक-अनुष्ठानात् पश्चात् प्रधानमंत्रिणा नरेंद्रमोदिना आधारशिला रूपेण 40 किलोमितां रजतमयीं ईष्टिकां स्थापितवान्। अवसरेऽस्मिन् आभारतात् नैकेभ्यो धार्मिक-स्थानेभ्यः भूमिपूजनाय मृत्तिका त्रिवेणीसंगमनदीनां पवित्रं च जलम् एकत्रीकृतम्। प्रधानमंत्री नरेंद्रमोदी कथितवान् यत् सीता-रामयोः आह्वानं न केवलं भगवतो रामस्य नगरे अयोध्यायां अपितु पूर्णविश्वस्मिन् गूंजायमानम्। राममंदिरं अस्मत् परंपराणाम् आधुनिकः प्रतीकभूतः। नरेंद्रमोदी राममंदिराय बलिदानं दत्तवद्भ्यो जनेभ्योऽपि सम्मानं प्रदत्तम्। मंदिरे प्राणप्रतिष्ठा उद्घाटन- अवसरे तेऽपि आमंत्रिताः। देशस्य कानिचन-राजनीतिक-दलानि आयोजनं बहिष्कुर्वन्ति। तेषां कथनं यत् मंदिरं पूर्णरूपेण न निर्मितम् मूर्तिप्राणप्रतिष्ठायाः किञ्चिदपि औचित्यं नास्ति। अपरत्र पीठानां शंकराचार्याः अस्मात् आयोजनात् प्रथकतं संस्थापितवन्तः। भगवानरामलला मूर्तिस्थापना विधिपूर्वकं शास्त्रसम्मतविधिना कार्यते। इत्यत्र काश्चित् आपत्तिर्नास्ति।

प्रो. श्रीनिवास वरखेड़ी
कुलपति
केन्द्रीय संस्कृत विश्वविद्यालय
संसद के अधिनियम द्वारा स्थापित
(पूर्व में राष्ट्रिय संस्कृत संस्थान,
शिक्षा मन्त्रालय, भारत सरकार के अधीन)

Prof. Shrinivasa Varakhedi
Vice-Chancellor
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India)

के.सं.वि./कुलपति-101/2023-24/ 483।

दिनाङ्क - 11.01.2024
21 पौष, शाक 1945

आज़ादी का अमृत महोत्सव

## शुभाशंसनम्

आपदामपहर्तारं दातारं सर्वसम्पदाम्।
लोकाभिरामं श्रीरामं भूयो भूयः नमाम्यहम्॥

विदितमेव समेषाम् आस्तिकोत्तमानां यदस्मिन्नेव मासे द्वाविंशे दिनाङ्के अयोध्यायां नवनिर्मितराममन्दिरे भगवतः श्रीरामस्य दिव्यप्रतिमायाः प्राणप्रतिष्ठापनकार्यक्रमः विद्यत इति। समग्रः सारस्वतलोकः अस्य कार्यक्रमस्य दर्शनाय समुत्सुकोऽपि वर्तते । अस्मिन् एव शुभमुहूर्ते सारस्वतसेवामाध्यमेन भगवतः श्रीरामस्य अर्चनवन्दनपूजनादिकं बहवो हि सम्पादयितुम् अभिलषन्ति इति विदित्वा नितरां प्रसीदामि।

अधुना संस्कृतसंवादः इत्येतस्याः पाक्षिकसंस्कृतपत्रिकायाः विशेषाङ्कस्य लोकार्पणकार्यक्रमः शुभसन्दर्भे जायत इति परमानन्दस्य विषयः। अस्याः भगवच्छ्रीरामचन्द्रविशेषाङ्कः इत्येषः विशेषाङ्कः अवतारपुरुषस्य मर्यादापुरुषोत्तमस्य श्रीरामस्य गुणगणान् द्योतयति इत्यतः अस्याः पत्रिकायाः सम्पादकाय श्री वेदप्रकाशशर्मवर्याय मम शुभाभिनन्दनानि। अस्याः पत्रिकायाः सम्पादकमण्डल्याः सर्वेभ्यः सदस्येभ्यः लेखकेभ्यश्च सन्दर्भेऽस्मिन् शुभाशयान् वितनोमि । विगतदशके समारब्धा एषा संस्कृतसंवादसमर्थिका संस्कृतपत्रिका उत्तरोत्तरं विकासं विन्दतु इति लोकाभिरामसंस्मरणम् ।

आचार्यः श्रीनिवासः वरखेडी,
कुलपतिः

56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058
56-57, Institutional Area, Janakpuri, New Delhi - 110058 (INDIA)
Ph. No.: (O) 011-28520949, EPABX : 28524993, 28521994, 28524995
EMAIL : vicechancellorcsu@gmail.com / vc@csu.co.in, WEBSITE : www.sanskrit.nic.in

प्रो. विजयकुमार सी.जी.
कुलपति
Prof. Vijayakumar C.G.
Vice Chancellor

महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय
(मध्यप्रदेश शासन द्वारा स्थापित)
देवास मार्ग, उज्जैन - 456 010 (म.प्र.) भारत
Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya
(Established by Government of Madhya Pradesh)
Dewas Road, Ujjain - 456 010 (M.P.) BHARAT

क्र./मपासंवि/कु.प./23/446

उज्जैन, दिनांक : 08 / 01 /2024

## शुभकामनासन्देश

प्रति,

**श्रीमान् वेदप्रकाश-शर्मा**
प्रबन्धसम्पादकः, संस्कृत-सम्वादः (पाक्षिकसंस्कृतपत्रम्)
सम्पादकीयकार्यालयः, ए-2/32, वजीराबाद-मार्गः, भजनपुरा, देहली

आदरणीय महोदय,

महतः प्रमोदस्य विषयोऽयं यत् अयोध्यायां नवनिर्मितस्य भगवच्छ्रीरामचन्द्रमन्दिरस्य विग्रहस्य प्राणप्रतिष्ठावसरे **संस्कृतसम्वादः** इत्याख्यप्रसिद्धसंस्कृतपत्रिकायाः भगवच्छ्रीरामचन्द्र-विशेषाङ्कनाम्ना प्रकाशनं २०२४तमवर्षस्य जानुवरीमासस्य १६तमे दिनाङ्के भविता। समाचारपत्रमिदं संस्कृतभाषायाः प्रचाराय प्रसाराय संवर्धनाय च स्वकीयं महत्त्वपूर्णं योगदानं ददानः २०११तमवर्षात् निरन्तरं प्रकाश्यमानं वर्तते। प्रभोः श्रीरामचन्द्रस्य जीवनसम्बन्धिताङ्कस्य इदं प्रकाशनं स्वागतयोग्यमस्ति। अहम् अस्मै प्रकाशनाय मत्पक्षतः अशेषाः शुभकामनाः प्रदीयमानाः सम्पादकमण्डलस्य अभिनन्दनं करोमि।

मर्यादापुरुषोत्तमस्य भगवतः श्रीरामस्य जीवनचरित्रेण सर्वान् परिचाययितुम् अयं प्रयासः अभिनन्दनीयः।


शुभकामनासहितम्।

भवदीयः
आचार्यः विजयकुमारः सी.जी
कुलपतिः

दूरभाष : 0734-2922037 मोबाईल : +91 93434 09392, +91 94236 00804
E-mail : vcpanini@gmail.com, cgvijayakumar@gmail.com Website : www.mpsvv.ac.in

कविकुलगुरू–कालिदास–संस्कृत–विश्वविद्यालयः
रामटेकनगरम् (महाराष्ट्रराज्यम्)
Kavikulaguru Kalidas Sanskrit University
Ramtek (Maharashtra)
Established by Government of Maharashtra; Accredited by NAAC with 'A+' Grade

प्रो. हरेराम त्रिपाठी
कुलगुरु
Prof. Hareram Tripathi
Vice-Chancellor



पत्र क्र. ककासंवि/व्हीसीओ/2024/26
दिनांक :– 17.01.2024

## शुभकामना सन्देशः

अयोध्यायां नवनिर्मितस्य भगवतः श्रीराममन्दिरस्य विग्रहस्थापनायां प्राणप्रतिष्ठायामुद्घाटनावसरे भगवतः श्रीरामस्य विशेषाङ्कावसरे शुभकामनां प्रयच्छामि।

संस्कृतसम्वादपत्रमिदं पाक्षिकरूपेण 2011 तः अद्यावधिपर्यन्तं सततं प्रकाशितं भवति। भारतीयसंस्कृतेः संस्कृतस्य च प्रसारं प्रचारञ्च पत्रमिदं करोति। तदर्थं सम्पादकस्य कृते अपि च धन्यवादं प्रयच्छामि।

प्रो. हरेराम त्रिपाठी
कुलगुरुः

Ramtek Office : Administrative Building, Mouda Road, Ramtek - 441106. Dist. Nagpur (M.S.)
Ph. No. : (07114) 255007 Email : vc@kksu.org Website - www.kksu.org www.kksanskrituni.digitaluniversity.ac

Prof- Shree Kishore Mishra
MA, Ph.D., Acharya;
Professor of Sanskit
Dean Faculty Of Arts
Banaras Hindu University
Varanasi - 221005

Residence
F-3, Awadhdham
B-27/31 K,Ravindrapuri Extension
Varanasi - 221005
Phone- (0542) 2310325
M- 9415685328

## आभ्युदयिकम्

यस्यामलं नृपसदस्सु यशोधुनापि
गायन्त्यघघ्नमृषयो दिगिभेन्द्रपट्टम्।
तं नाकपालवसुपालकिरीटजुष्ट-
पादाम्बुजं रघुपतिं शरणं प्रपद्ये ॥

वाल्मीकिवचनेषु सर्वसत्त्वमनोहरस्य रूपदाक्षिण्यसम्पन्नस्य जीवलोकरक्षकस्य स्वजनाभिरक्षितुः स्ववृत्तधर्मरक्षितुः परन्तपस्य लोकरक्षकस्य मर्यादाकर्तुर्लोककारयितुरर्चिष्मतः साधूपकारज्ञस्य राजविद्याविनीतस्य श्रुतवतः शीलसम्पन्नस्य यजुर्वेदविनीतस्य वेदवित्सुपूजितस्य वेदवेदाङ्गधनुर्वेदनिष्ठितस्य सत्यधर्मपरस्य सङ्ग्रहानुग्रहरतस्य देशकालविभागज्ञस्य सर्वलोकप्रियम्वदस्य, व्यासव्याहृतिषु च भगवत आदिपुरुषस्य लक्ष्मणाग्रजस्य सीताभिरामस्योत्तमश्लोकस्य आर्यलक्षणशीलव्रतस्योपशिक्षितात्मन उपासितलोकस्य साधुवादनिकषणस्य ब्रह्मण्यदेवस्य महापुरुषस्य महाराजस्य श्रीरामचन्द्रस्य गुणगणानुरणनेन पवित्रिताधरमात्मानं विधातुम् को न कामयिष्यत इत्याकलय्य बालरूपस्य तस्य परमेशितुर्नूत्नदेवप्रासादप्रतिष्ठोत्सवे संस्कृतसंवादाभिधसमाचारपत्त्रं भगवच्छ्रीरामचन्द्रविशेषाङ्कं प्रकाश्य पाठकलेखकसम्पादकादिसमूहं पुण्यलाभेन संयोजयतीति मोमुद्यमानमानसैरस्माभिर्भूयस्यः शुभकामनाः प्रस्तूयन्ते।

सुरोसुरो वाप्यथ वानरो नरः
सर्वात्मना यः सुकृतज्ञमुत्तमम् ।
भजेत रामं मनुजाकृतिं हरिम्
य उत्तराननयत् कोसलान् दिवम्। ।

मकरसंक्रान्तिपर्व
विक्रमसंवत्-२०८०

(श्रीकिशोरमिश्रः)

# सम्पादकीयम्

**सहृदयाः संस्कृतानुरागिणः!**



महतः प्रमोदस्यायमवसरः यद् भारतीयसंस्कृतिसंवाहकस्य मर्यादापुरुषोत्तमस्य भगवतः श्रीरामचन्द्रस्य विग्रहस्थापना प्राणप्रतिष्ठा च जनवरीमासस्य 22तमे दिनांके भविता।

तथ्यमिदमङ्गीकृत्य 'संस्कृत-संवाद' इति पाक्षिकसंस्कृतसमाचारपत्रस्यायमंकः भगवच्छ्रीरामचन्द्र-विशेषांकत्वेन प्रकाश्यते। तत्र भवतां समेषां साहित्यानुरागिणां, साहित्यसेविनां, लेखाः, कविताः, विचाराः अहमहमिकया समागताः अस्मत्कृते सुखकरमिति।

प्रत्येकं भारतीयस्य हृदि वसतो भगवद्रामचन्द्रस्य प्राणप्रतिष्ठा आमोदस्यैव विषयः नात्र संशीतिः।

मर्यादापुरुषोत्तमः भगवच्छ्रीरामचन्द्रः नैजैः अप्रतिमगुणैः जनमानसपटले राराज्यते। श्रीवाल्मीकिजिज्ञासा- 'चारित्र्येण-च को युक्तः' 'रामो विग्रहवान् धर्मः।' तथ्यमिदं मर्यादा पुरुषोत्तमस्य महिमानं पुष्णाति।

वस्तुतःश्रीरामस्य सम्पूर्णमपि व्यक्तित्वं धर्मविग्रहस्वरूप-मेवास्ति। भगवच्छ्रीरामचन्द्रस्य सम्पूर्णमपि जीवनं संघर्षस्य विघ्नानामाकरमिति मन्यते। यत्र एकतो राज्यप्राप्तिपूर्वव-नगमनमन्यत्र मातुः सीतायाः रावणद्वारा अपहरणम् रावणेन सह युद्धं, वनागमनानन्तरं पत्नीविषयकः जनापवादः पत्नीद्वारा अग्निपरीक्षा निजपुत्राभ्यां लवकुशाभ्यां युद्धादिकम्। श्रीरामस्य सर्वमपि जीवनं कष्टप्रदम्। विपरीतेऽपि काले धैर्यं संस्थापयता श्रीरामेण निजरामत्वं प्रकटीकृतम्। सम्पूर्णमपि भारतीयवाङ्मयं रामकथया परिपूर्णतां याति। यत्र राजानककुन्तकः वक्रोक्तिजीविते श्रीरामस्य रामकथायाश्च वर्णनं 'रम्या-रामायणी कथा' रूपेण वर्णयति। नाटककारः भवभूतिः स्वीये उत्तररामचरितमिति नाटके रामस्य वैशिष्ट्यं विज्ञापयति। श्रीरामः ब्रूते यत् स्नेहं, दयां, सौख्यादिकमुतवा जानकीमपि लोकानुरंजनाय प्रजानां सुखाय वा यदि त्यजनीयं भवेत् तत्र मे मनसि काऽपि व्यथा नास्ति। कथनेनानेन ज्ञातुं शक्यते मर्यादापुरुषोत्तमस्य वैशिष्ट्यमिति।

**यावत्स्थास्यन्ति गिरयःसरितश्च महीतले।**
**तावत् रामायणकथा लोकेषु प्रचलिष्यति॥**

इत्यादिभिरार्षवचनैरस्माभिःभगवच्छ्रीरामचन्द्रस्य व्यक्तित्वं ज्ञातुमनुमातुमवबोद्धुञ्च शक्यते।

वर्तमानकाले तार्किके प्रायोगिकेऽस्मिन् युगे- रामादिवद् वर्तितव्यमित्युपदेशः अपि रामस्य प्रासंगिकतामुपयोगिताञ्च ख्यापयति। कालेऽस्मिन् मन्दिरस्य निर्माणं प्राणप्रतिष्ठा च प्रत्येकं सनातनमूल्यसंरक्षकेभ्यः आनन्दातिरेकस्य विषयः। अत्र अस्माभिः तेऽपि स्मरणीयाः यैः आन्दोलनेन, त्यागेन, पौरुषेण श्रीराममन्दिरस्य कपाटमुद्घाटितम्। तेष्वन्यतमाः विश्वहिन्दुपरिषदध्यक्षाः अशोकसिंघल, पूर्वमुख्यमंत्री कल्याणसिंह प्रभृतयः। येषामुत्कटैकमभिलषितं वर्तमानकाले पूर्णतां याति। उच्चतमन्यायालयस्यादेशेन वर्तमानकालीन-नरेन्द्रदामोदरदासमोदि- सर्वकारसत्प्रायेसेना- संख्यहिन्दूनां मनोकामना पूर्णा जायमाना वर्त्तते इति सुखकरम्।

देशस्य प्रत्येकं कोणे-कोणे भगवच्छ्रीरामचन्द्रस्य कथा, गीतिः,उद्घोषः,वार्ता, चर्चा च चर्च्यते। सर्वत्र राममयं वातावरणमवलोक्यते। जनाःमुदिताः सन्तः अयोध्यां यान्ति, 'राम-रामेति रामेति'-इत्युद्घोषयन्ति । एतादृशं दृश्यं कस्य सनातनधर्मप्रियस्य हृदयं चमत्कृतं न कुर्यात्।

भौतिकतावादिनि युगेऽस्मिन् रामस्य आवश्यकता अपरिहार्या वर्त्तते। जनाःआधि-व्याधि-संतापैः संतप्ताः अवलोक्यन्ते। एतादृशमायोजनं न केवलं धर्ममयमपितु लोकानुरंजनपूर्वकं रामपदचिह्नगमनद्वारा जनमानसाय कल्याणप्रदभावनां बिभर्ति।

**-डॉ.विमलेन्दुकुमारत्रिपाठी**

## जानकी



**पद्मश्री प्रो.अभिराजराजेन्द्रमिश्रः**

सर्वदेवताऽनुशंसनं जिगाय जानकी
लोकरावणं यमास्पदं निनाय जानकी॥१
तीरभुक्तिवन्द्यमृत्तिकान्तरात् समुत्थिता
नैमिषे विवेश तत्र विश्रमाय जानकी ॥२
यद्धि राघवस्सुखेन महाविष्णुतां गतः
तत्र कारणं बभूव सम्भवाय जानकी॥ ३
कानने प्रतिष्ठितं विलोक्य कान्तराघवम्
प्राक्ततोऽप्यहो पुरस्मृता वनाय जानकी॥४
चित्रकूटकाननेऽपि सा पुलिन्दसन्निधौ
नूतनां पुरीमरीरचत् सुखाय जानकी॥५
देवरेण वन्दिताऽथ वल्लभेन रञ्जिता
नो शुशोच वा तताप वैभवाय जानकी॥६
दण्डके प्रयाच्य वल्लभं नु काञ्चनं मृगम्
रावणस्य मृत्युभूमिकां चिकायजानकी॥७
लोकवन्दितं हि राघवं समाजपूजितम्
कर्तुमग्निसादभूत् पुनर्भवाय जानकी॥८
किन्न सोढमहो रूपशीलबालया तया
या जिजीव, या मृता च राघवाय जानकी॥९
लवकुशाञ्जनेयनामभिस्त्रिभिः स्वपुत्रकैः
पुत्रवत्यहो बभूव सौभगाय जानकी ॥१०
नैव राघवस्य कापि कथा लोकविश्रुता तां
चकार लोकरञ्जनोत्सवाय जानकी॥११
हन्त ! आदिकविरभूद्धि वल्मीकजः
कविः यं ववार नन्दिनीव तत्सुखाय जानकी ॥१२
रामजानकीमयं विलोक्य पूतभारतम्
श्रेयसे न कस्य राम उत्सवाय जानकी ॥ १३

## विभीता सीता

वीक्षते विभीता सीता क्वास्ति देवरो मे
क्वास्त्यरण्यबन्धुर्मेऽसौ क्वास्ति सोदरो मे?
पूततीर्थसेवातृषा दोहदाऽभिभूता
श्वापदप्रचारे वने क्वाऽहमत्र नीता।
आपतेद् विराधो भूयो दूषणोऽपरो मे !!१॥
संशये निमग्ना साऽहं निर्णयं न जाने
भाविनी ललाटन्तपा नियतिकथा का मे?
भात्यदृष्टभोगोऽक्षीणो विपन्निर्भरो मे !!२॥
भूमिगर्तभेदाज्जाता नो पिता न माता
वने सुखं दुःखं सोढं पुनर्वनमवाप्ता
वनं भाति धातस्सम्प्रति भाग्यतस्करो मे॥३॥
जानकीविलापं श्रुत्वा खगास्त्यक्तगानाः
कुशग्रासविरता मृग्यो द्रुमा वेपमानाः
नो विभाऽवशिष्टा सूर्ये कौमुदी न सोमे !!४॥
पिपृच्छन्ति सीताव्यथां स्थविरमृगवधूट्यः
नयनसलिलवाक्यैः सर्वास्तां भृशं लिहन्त्यः
केन कुलिशघाता जाते! अर्पितास्तवेमे??५॥
समुच्छलति सीतागर्भः प्रतीकाररोषात्
मातृविपच्छूलं दृष्ट्वा पितुश्चापि दोषात्
जनय जननि! शीघ्रं यथाऽनुभव विक्रमं मे !!६॥
समाश्वसिहि वत्से! प्रीत्या वचो भणति कोऽयम्
वाल्मीकिनामा मुनिस्तातसखस्सोऽहम्
इतः परं पुत्रीभूता वसस्याश्रमे मे॥७॥
अलं मन्युना ते जाते शमय तं नु कान्ते
इतः परं निवस सुखं ममाश्रये शान्ते
जित्वरप्रसविनी भूयाः पुत्रि! कान्तकामे ॥८॥
योगचक्षुषाऽहं प्रेक्षे पुत्रि! यद्धि दृश्यम्
सन्ततिं तवोग्रां सीते! मङ्गलं भविष्यम्
अलं हृदयतापैर्वत्से! ताप्यते मनो मे॥९॥
भविष्यन्ति सख्यः सर्वा दारिका मुनीनाम्
भविष्यति विकासो नूनं पुत्रि! सद्गुणानाम्
जायते प्रसूतिर्जाते! तवाऽप्याश्रमे मे॥१०॥
शनैः शनैरग्रे सरति मुनिर्धर्ममित्रम्
क्रिया तमनुगच्छति सीता, कीदृशं विचित्रम्
काननं स्वसदनं जातं यत्र सुखं रेमे ॥११॥

## कदाऽऽगन्तासि दाशरथे !!

अहल्याः कति शिलायन्ते कदाऽऽगन्तासि दाशरथे
शबर्यस्त्वां प्रतीक्षन्ते कदाऽऽगन्तासि दाशरथे ॥१
जनस्थानेषु नक्सलवादिनः खरदूषणास्त्वेते
विमुग्धान् मडमडायन्ते कदाऽगन्तासि दाशरथे ॥२
निषादस्ते विषादार्तोऽधिगङ्गं सेतवो विहिताः
क्व नद्यो नौभिरट्यन्ते कदा गन्तासि दाशरथे ॥३
निबद्धं वानरान् तीर्थेऽथ हन्तुं वा समुद्घोषः
विपन्नास्ते पलायन्ते कदाऽगन्तासि दाशरथे॥४
न सम्पातेर्जटायोर्वा क्वचित्संलक्ष्यते वंशः
न गृद्धाः क्वापि जायन्ते कदाऽगन्तासि दाशरथे ॥५
कुटुम्बोऽलक्षितो युक्तो न शत्रुघ्नो भरतसेवी
गृहिण्यो मन्थरायन्ते कदाऽऽगन्तासि दाशरथे ॥६
गजारूढोऽद्य शम्बूको जंनान् मनुवादिनो ब्रूते
मठाधीशा विटायन्ते कदाऽऽगन्तासि दाशरथे॥७
हता लङ्कारणे दनुजाः पुनर्जाताश्च नेदिष्ठाः

## रामायणमाहात्म्यम्



**प्रो.राधावल्लभः त्रिपाठी**
**पूर्वकुलपतिः**
**राष्ट्रियसंस्कृतसंस्थानम्**

इन्दीवरदलश्यामं गुणग्रामं मनोहरम्।
निकामं कामनारामं जितकामं स्वरूपतः॥१॥
लोकाभिराममारामं धर्मद्रुमसमन्वितम्।
श्रीरामं तमहं वन्दे विरामं पापकर्मणाम्॥२॥
संसारसागरोद्धारमहापोतसमं ध्रुवम्।
शब्दब्रह्मविवर्तानां समाहारेण निर्मितम्॥३॥
काव्यं रामायणंयस्मिन् निखिलं सम्प्रतिष्ठितम्।
सारस्वतं च साम्राज्यं भारतस्य च गौरवम्॥४॥
अवतीर्णा स्वतो यस्मिन् साक्षात् पुण्या सरस्वती।
क्षालयेदखिलं तन्मे कालुष्यं चित्तसञ्चितम्॥५॥
कर्तारं तस्य काव्यस्य द्रष्टारं युगसन्ततेः।
स्रष्टारं नव्यजगतां नमाम्यादिकविं च तम्॥ ॥६॥

**टि.- विवर्तानामिति। विवर्तो नात्र शाङ्कराद्वैतसम्मतः,अपितु शब्दब्रह्मणोऽर्थभावपरिणतिरूपः। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत इति वाक्यपदीयकारोक्तेः। युगसन्ततिर्युगप्रवाहः।**

व्यासा नैके प्रजायन्ते काले काले युगे युगे।
पुराणानि नवीनानि रचयन्ति तथैव ये॥७॥
नारदा अपि जायन्ते नानाविधा विचक्षणाः।
तेषु तेषु समाजेषु समये समये च ते॥८॥

**टि.-नारदा अपीति। यथाऽस्मिन्नेव महाकाव्ययोः द्वयोर्नारदयोर्वर्णनम्।**

वाल्मीकिः किन्तु विश्वेऽस्मिन्नेक एव बभूव यः।
अद्वितीयस्तथा चाद्यः स्वयम्भूरिव सत्कविः॥९॥
सन्ति रामायणान्यत्र सहस्रशो महीतले।
वाल्मीकेस्तु कृतिर्धातुः सृष्टिराद्यैव विद्यते॥१०॥

**टि.-धातुः आद्या प्रथमा सृष्टिः, यद्वा सर्वोत्कृष्टा सृष्टिः। या सृष्टिः स्रष्टुराद्येति कालिदासोक्तेः धातुराद्यया सृष्ट्या जलेन उपमा व्यज्यते।**

रमणीयं प्रसन्नाम्बु गङ्गाया इव निर्मलम्।
तपःपूतस्य तस्यर्षेरन्तरात्माऽथवा यथा।११॥
आदिकाव्यं वरीवर्ति यद्धि रामायणाभिधम्।
भूतं यस्मिन् भविष्यं च भारतस्य निदर्शितम्॥१२॥
इदमन्धं तमः कृत्स्नमस्थास्यद् भुवनत्रयम्।
यदि नादीपयिष्यत् स ज्योती रामायणं कविः॥ १३॥

**टि. - काव्यादर्शकारोक्तेश्छाया। रामायणं ज्योतिरिति रूपकम्। वाल्मीकिः कविशुक्रयोरिति अमरकोशवचनात् वाल्मीकेरभिधानमेव कविरित्यत्रोरीकृतम्।**

यथादृष्टं यथाऽदृष्टं यथाश्रुतं यथाऽश्रुतम्।
रामस्य चरितं तेन रामायणे हि कीर्तितम्॥१४॥

**टि. - यथादृष्टं स्वचर्मचक्षुर्भ्यां दृष्टम्, यथा अदृष्टमिति अन्यैर्यथा न दृष्टं तेन स्वदिव्येन प्रातिभेन वा चक्षुषा दृष्टमिति भावः। एवमेव- यथाश्रुतं यथाऽश्रुतमित्यत्रापि योज्योऽर्थः।**

पूर्ववृत्ताः प्रसङ्गाश्च हस्तामलकसन्निभाः।
प्रत्यभान्त पुरस्तस्य घटिता घटना यथा॥१५॥
वाल्मीकिना स्वयं दृष्टा रामजीवनरेखिकाः।
उन्मील्य तूलिकाभिस्ताः चित्रत्वेन विनिर्मिताः॥१६॥

**टि.- रेखाचित्रेणालेख्यस्योन्मीलनं कालिदासेन वर्णितम्-चित्रे निवेश्य परिकल्पितसत्त्वयोगेति शाकुन्तले, उन्मीलितं तूलिकयेव चित्रमिति कुमारसम्भवे च।**

रामस्य कोऽपि नामापि क्वाज्ञास्यद् भुवने जनः॥१७॥

**सार. - प्रज्ञासम्पन्नः प्राज्ञः। कविर्वाल्मीकिः। जाते जगति वाल्मीकौ कविरित्यभिधाऽभवदित्युक्तेः। बिल्हणकवेरुक्तेः प्रभावोऽत्र मृग्यः।**

रामः स्वयं यथादृष्टः कविना क्रान्तदर्शिना।
तस्य सत्यं तथा तस्य चायतिस्तेन वर्णिता॥१८॥
रामो यद् रामतां यातो रावणो रावणायितः।
जगदम्बायिता सीता वाल्मीकिस्तत्र कारणम्॥१९॥
कविः प्रजापतिर्विश्वं स मृत्पिण्डोपमं त्विदम्।
प्रतिभाकुलालचक्रे स्वे निवेश्याकृतिमादधे॥२०॥
रमन्ते योगिनो यस्यां भक्ता ध्यायन्ति यां सदा।
मन्यन्ते यत्स्वरूपं ते मर्यादापुरुषोत्तमम्॥२१॥

**टि.-प्रतिभाकुलालचक्र इति रूपकम्।**
**(राधावल्लभत्रिपाठिनः मुद्रणाधीनात् कविचरितामृत-महाकाव्यात्।)**

---

निजातङ्गैर्यमायन्ते कदाऽऽगन्तासि दाशरथे ॥८
निरुद्धं त्वद्गृहद्वारं चिरं यावन्वहोऽर्गलितम् ।
अयोध्या मोचिताऽस्त्यन्ते कदाऽऽगन्तासि दाशरथे॥९
प्रभो ! पश्चात्तपति रजको जनकजाशीलविद्वेषी
शठा अधुना बुधायन्ते कदाऽऽगन्तासि दाशरथे॥१०
त्वदीयं रामराज्यं भारते भूयोऽप्यथानेतुम्
नरेन्द्रा लोलुपायन्ते कदाऽऽगन्तासि दाशरथे ॥११
जना भागीरथीं वज्राङ्गबलिनं प्रति दृढ़ा जाताः
स्मृतौ ते लवकुशायन्ते कदाऽऽगन्तासि दाशरथे ॥१२
कवीन्द्रो जानकीजीवनमहाकाव्यस्य कर्ताऽयम्
'भिराजोऽप्यात्मनाऽयं ते कदाऽऽगन्तासि दाशरथे॥१३

## राम! आस्से हृदस्पन्दनेऽहर्निशम्



(कांग्रेसशासनकाले सेतुसमुद्रमिति योजनास्वीकृत्यै सर्वोच्चन्यायालये केनचित्पुरातत्त्ववेत्रा-'रामस्यैतिहासिकं साक्ष्यं नास्तीति शपथपत्रमदायि, अतोऽत्यन्तं व्यग्रोभूत्वा मया तदा कवितेयं व्यरचि।)

आचार्य रहसबिहारी द्विवेदी
पूर्व-आचार्यः संस्कृतविभागः
रानीदुर्गावतीविश्वविद्यालयः
जबलपुरम् (म.प्र.)

राम! आस्से हृदस्पन्दनेऽहर्निशं किं स्वकं हृद् विदीर्याद्य साक्ष्यं ददै ।
नास्तिकैर्दृश्यसे नो तथापि प्रभो! किं श्रयै हन्त! तेऽस्तित्वसंसिद्धये ।।१।।
राम! मन्मानसे किं विलीनोऽधुना मन्यते नो पुरावित् प्रमाणं विना ।
किन्न निर्गच्छसि त्वं प्रभो मे बहिः स्तम्भमुद्भिद्य जातो यथा त्वं पुरा ।।२।।
भूमिगर्भोत्खने मूर्तिमुद्रादिकं चोरितं यत्सुदूरं भुवि स्थापितम् ।
भूभृतः संस्थितिस्त निर्णीयते किन्तु बन्धो न मान्यो पुरावेतृभिः ।।३।।
दर्शने भारतीये बुधैर्मन्यते ह्याप्तवाक्यं प्रमाणं ध्रुवं सर्वतः ।
दृष्टमात्रं प्रमाणं हि यैर्मन्यते तत्पितुर्नाम सत्यं कथं मन्यताम् ।।४।।
सीतया सार्द्धमागच्छता वर्णिता सागरोल्लोलिता या सुनामीगतिः
सेतुना चूर्णिता फेनिला रोधिता तेन संस्थापितस्ते शिवो रक्षितः ।।५।।
सेतुबन्धो हि चेद् भ्रंश्यते कृत्यते कः सुनाम्या लहर्या भवेद्रक्षकः ।
तेन ग्रस्ता हि रामेश्वरीया मही राष्ट्रभूमिर्निमग्ना भविष्यत्यहो ।।६।।
येन भूकम्पनं सेतुना रोधितं निष्प्रभावीकृतोग्रा सुनामीगतिः
धूर्जटिः सेतुबन्धेश्वरो रक्षितः सर्वमेतद्धि को राम! रक्षिष्यति ।।७।।
ते महावीर दूतेन भस्मीकृतं रावणातङ्कवादप्रशिक्षास्थलम् ।
सेतुबन्धं विधाय स्थलाक्रान्तितः स त्वयाऽऽतङ्कसंचालको नाशितः ।।८।।
भारतीयैँश्च यूनो हि तस्य स्वसा लुभ्यमानाऽऽगता छद्मरूपेण या ।
आगता भारते तेऽनुजेनैव सा कर्णनाशे च भङ्क्त्वा परावर्तिता ।।९।।
सा ततः कर्णनाशामुखाच्छादिनी शुक्रशिष्या हि सेयं बहुद्व्रहतः ।
वासनापूर्तितो राक्षसानां कुलं सा सृजन्ती स्वयं चान्यदेशं गता ।।१०।।
राष्ट्रभद्रङ्कराणामृषीणां वधं यज्ञविध्वंसनं संस्कृतेर्नाशनम् ।
कुर्वतां रक्षसां सर्वनाशं त्वया कुर्वता राष्ट्रमातुः सुता रक्षिता ।।११।।
अन्तरे भक्तिमत्सु त्वामास्से सदा जन्मभूमन्दिराद्रक्षकोऽसि ध्रुवम् ।
एड्सतो मुक्तये नासिकाकर्तने राष्ट्रगातङ्किनां नाशने प्रेरकः ।।१२।।
या न योध्या ह्ययोध्या पुरा संस्थिता फैजवादाधियुक्ताऽभवद्धन्य! सा ।
आधिमुक्ताह्ययोध्या मुदा युज्यते रामसद्विग्रहा राजतां भ्राजताम् ।।१३।।
मोदितोमुद्यतां योगितोयुज्यतां भारतादित्यवंशो नरेन्द्रायताम् ।
रामराज्यं पुनः भारते राजतां भारती भारतीया वरीवर्द्धताम् ।।१४।।

## कुर्महे राम! ते स्वागतम्



डॉ. नवलता

**अद्य पूर्णं समेषां व्रतम्।**
**कुर्महे राम! ते स्वागतम्।।**

देशकालादतीतो यदा जायसे।
रामकृष्णादिरूपेण संज्ञायसे।।
धर्मरक्षासमर्थां भुवं रक्षितुं
सर्वदा नामरूपं धृतम्।।1।।

सूर्यवंशे भवै राजभिः रक्षिता।
धर्मशीलप्रजाश्रद्धया सेविता।।
कोसलेशप्रतिष्ठापदं भूतले,
द्योतते भूरि सर्यूतटम्।।2।।

ते तनुत्यागशप्ता सरिच्छारदा।
मोक्ष्यते कल्मषैर्भूयसा वा कदा।।
ते कृपां कांक्षते तत्प्रतीक्षारतं
निर्मलं यत्र सर्यूजलम्।।3।।

मान्यतेऽद्यात्र सर्वत्र दीपावली।
गीयते कोटिभिर्मञ्जुगीतावली।।
मानवः कोऽनुमातुं क्षमो भूतले
लीलयैव त्वया यत् कृतम्।।4।।

दुन्दुभिर्गोमुखो झर्झरी खञ्जरी।
घण्टिका घर्घरं वल्लकी झल्लरी।।
सर्वमेतत्समाहत्य पुष्पाक्षतैः
कोटिदीपैश्च नीराजनम्।।5।।

अम्बरे राजते काऽपि दिव्यप्रभा।
सज्जिताऽऽसावयोध्या वधूसन्निभा।।
पङ्कजैर्वीथिका-वीथिका कीलिता,
वर्द्धते त्वद्गृहम् शोभितम्।।6।।

जन्मभूमिस्त्वदीयेह विश्वम्भरा।
दृश्यते सर्वतो हृष्यमाना धरा।।
सात्त्विकी भावना जागृता सर्वतः,
क्षीयते किञ्च यत्तामसम्।।7।।

केकयाधीशपुत्रीसुताराधिता।
वीरशत्रुघ्नभक्तिप्रतिष्ठापिता।।
लक्ष्मणप्रार्थिता तावकी सा पुरी,
जीयतां भूतले सन्ततम्।।8।।

## प्राणप्रियो राघवः




प्रणेता©
प्रो.ताराशंकरशर्मा पाण्डेयः

**प्रासादमुख्ये चलन्**
श्रीरामस्स्फटिकाङ्गणे दशरथ-प्रासादमुख्ये चलन्
कौसल्याधृतपद्महस्तप्रसरः पादाब्जयुग्मं धरन्।
काकुत्स्थो वलयावृतात्मचरणः पित्रोर्मुखं प्रेक्षते
तौ श्रीरामललाजिराभिरमणं दृष्ट्वा मुदं प्रापतुः।।1।।
**मातृत्रयीलालितः**
अंकादंकगतः कदाचिदपि नो धत्ते पृथिव्यां पदं
नेत्राकूतवचा हसन् कलकलं कुर्वन् सदाकारितः।
प्राप्तप्रेमपदः प्रमोदविषयो मातृत्रयीलालितो
रामो दाशरथिः प्रभुर्विजयते लोकत्रयीपालकः।।2।।
**लुक्कायितो हर्षितः**
मात्रंकादवतीर्य यो दशरथ-क्रोडङ्गतः प्रेमतो
हस्ताच्छादितमूर्द्धवक्त्रवसनो लुक्कायितो हर्षितः।
ज्ञातोऽभूज्जननीसहोद्भववरै रामो विलोक्य स्मितः
कौशल्यांकसमागतः पुनरपि प्राणप्रियो राघवः।।3।।
**चक्षुःपिधानक्रिया**
रामोऽन्वेषणतत्परो हि परितो विश्वासपूर्णेक्षणः
तस्मात्तेन विलोक्य सत्वरमरे! प्रासादशालाजिरम्।
मातुः सुन्दरशाटिकांचलमुखा चक्षुःपिधानक्रिया-
संलग्ना भरतादयश्च सहजाः सर्वे समासादिताः।।4।।
**रामानुगा भ्रातरः**
मात्रोच्छालितगेन्दुकश्च गगने गच्छन् धरामागतः
तद् धृत्वा भरतो द्रुतं लघुकरो रामाय हृष्टो ददौ।
कौशल्या च सुमित्रया प्रभणिता दृष्टं त्वया प्रेम भोः
केकेयी हृदये व्यचारयदहो रामानुगा भ्रातरः।।5।।
**रामोऽभवत् क्षत्त्रियः**
पित्रादिष्टिधनुशिलीमुखकरो लक्ष्यैकचक्षुर्वरो
विद्याभ्यासपरो धनुर्धरवरो रामोऽभवत् क्षत्त्रियः।
विश्वामित्रगुरुस्तपस्विचरितो नीत्वा वनं ब्रह्मवित्
सद्विद्येऽतिबलाबलेऽतिरुचिरे रामाय सम्यग् ददौ।।6।।
**रामोधिराजो वरः**
कौशल्यायनिरामपादनिरतो नित्यं सुमित्राजनिः
केकेयीभरतोऽग्रजातपदवी-रक्षाकरः पश्चिमः।
शत्रुघ्नोपि सदाभवत् सहमतिः प्रेमावहो भ्रातृषु
छत्रच्छायनिभः प्रजासु सततं रामोधिराजो वरः।।7।।
**सीताप्रियास्ते बभुः**
येऽयोध्याजनताहिताधिकरणाः काकुत्स्थवंशोद्भवाः
शत्रुघ्ना भरताः तपस्विचरिता लोकेक्षणा लक्ष्मणाः।
चत्वारश्चतुरा रणाजिरचरा रामादयो भ्रातरः
तूणीबाणधनुर्धराः सुजनयः सीताप्रियास्ते बभुः।।8।।
**दिव्यप्रभाविग्रहः**
सम्प्राप्तो भुवनत्रयीप्रियलला मूर्तित्रयीसञ्चितः
श्रीरामोऽरुणयोगिराजफलितो दिव्यप्रभाविग्रहः।
श्रीशोभास्पदजन्मभूमिलसितो बालस्वरूपाद्भुतोऽ-
योध्यामन्दिरराजमानललितो देवैर्जनैर्ध्यायते।।9।।
**राज्याभिषेकोत्सवे**
आनन्दोदधिमज्जनोन्मुखपदे रामायणावर्णने
तद्वाल्मीकिमुनिस्वकीयकथने राज्याभिषेकोत्सवे।
मर्यादाकृतिरामराज्यसरणी
**सर्वत्र गेहस्थिता**
लोकामोदकरी गृहोज्ज्वलकरी दीपावली संस्मृता।।10।।
**राष्ट्रोन्नतेः कारकः**
विश्वेऽस्मिन् स जगत्प्रकाशकरणः सम्यक्क्रियासाधक
आदित्यान्वयलब्धदिव्यजननोऽ-योध्याधराभारतः।
संप्राप्ताऽमितराजनाथसदनो राष्ट्रोन्नतेः कारकः
श्रीसीतारमणः प्रियस्वजनताऽऽमोदी नरेन्द्रो जयेत्।।11।।

इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित- प्रतिनवबाणभट्ट- पण्डित-श्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्लाजीवैदिक-विश्वविद्यालय-कुलपतिना प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं "प्राणप्रियो राघवः" एकादशश्लोकीरामकाव्यं सम्पूर्णम्।

## एहि बन्धो त्वरा तत्र गत्वा मुदा। सर्वदा रामनामामृतं पीयताम्।।



-डॉ श्रेयांश द्विवेदी
संस्थापककुलपतिः
MVSU कैथल, (हरियाणा)

भारतस्य प्रसिद्धास्त्ययोध्या श्रुता,
जन्मभूमिस्तु रामस्य दिव्या प्रभो।
रामचन्द्रस्य दिव्यास्ति मोदस्थली,
भाति मह्यं तपः पूरितेयं धरा।।
एहि बन्धो त्वरा तत्र गत्वा मुदा।
सर्वदा रामनामामृतं पीयताम्।। 1
निर्मितं शोभनं मन्दिरं सुन्दरम्,
भारतं भारतं तेन सन्निर्मितम्।
सा पुरी रम्यरम्योत्तमा भारते,
सर्वसौख्यप्रदेयं पुरी राजते।।
एहि बन्धो त्वरा तत्र गत्वा मुदा।
सर्वदा रामनामामृतं पीयताम्।। 2
शुभ्रवर्णोत्तमेऽयं पुरी सुन्दरी,
श्रूयते धर्मपुण्येषु सर्वोत्तमा।
तत्र श्रद्धान्वितो मानवः प्रत्यहम्,
रामनामामृतं संस्मरन् शोभते।।
एहि बन्धो त्वरा तत्र गत्वा मुदा।
सर्वदा रामनामामृतं पीयताम्।। 3
गोपुरं सुन्दरं निर्मितं ब्रह्मणा,
प्राङ्गणं मण्डपं दर्शनीयं महत्।
इष्टिका तत्र सर्वोत्तमा योजिता,
वर्णितं चित्रकाव्यात्मकं शोभनम्।।
एहि बन्धो त्वरा तत्र गत्वा मुदा।
सर्वदा रामनामामृतं पीयताम्।। 4
मार्गमत्यद्भुतं यानमप्यद्भुतम्,
धर्मशालाधुना निर्मिताप्यद्भुता।
यज्ञशाला तथा पर्णशालाद्भुता,
पाकशाला सुसन्निर्मिता स्वास्थ्यदा।।
एहि बन्धो त्वरा तत्र गत्वा मुदा।
सर्वदा रामनामामृतं पीयताम्।। 5
उत्तमास्तत्र वृक्षाः समारोपिताः,
निर्मलं पावनं शीतलं तज्जलम्।
वाति वायुःसदानन्ददो मोक्षदः,
पुष्पितं काननं तत्र संराजते ।।
एहि बन्धो त्वरा तत्र गत्वा मुदा।
सर्वदा रामनामामृतं पीयताम्।। 6
मेघमालानुकूला सदोपस्थिता,
नाऽतपो नैव शैत्यं हि कष्टप्रदम्।
रामराज्यं सदैवाऽत्र सन्दृश्यते,
मानवाः सुप्रसन्नाः समे ह्युत्तमाः।।
एहि बन्धो त्वरा तत्र गत्वा मुदा।
सर्वदा रामनामामृतं पीयताम्।। 7
पूर्णिमारोहिणीस्वातियुक्ता सदा,
पुष्यनक्षत्रयोगोऽथवा सिद्धिदः।
प्रत्यहं दिव्ययोगादयो निर्मिताः,
स्वानुकूला सुरम्या पुरी सा दृढा।।
एहि बन्धो त्वरा तत्र गत्वा मुदा।
सर्वदा रामनामामृतं पीयताम्।। 8
उच्चराशिस्थिताः सर्वदा सद्ग्रहाः,
सूर्यभौमौ गुरुर्भार्गवौ मानदौ ।
जन्मभूमौ सदा तेऽनुकूलाः ग्रहाः,
केन्द्र मध्ये त्रिकोणे शुभाः सर्वदा।।
एहि बन्धो त्वरा तत्र गत्वा मुदा।
सर्वदा रामनामामृतं पीयताम्।। 9
नातिवृष्टिर्न भूकम्पबाधा क्वचित्,
नह्यनावृष्टिरद्यावधिर्दृश्यते।
तेन लोकाः समस्ताः सदाह्लादिताः,
मानवेभ्यो पुरीयं सुसौख्यप्रदा।।
एहि बन्धो त्वरा तत्र गत्वा मुदा।
सर्वदा रामनामामृतं पीयताम्।। 10
जातिभेदो न कुत्रापि सन्दृश्यते,
धर्मभेदस्य चर्चापि न श्रूयते।
कर्म कुर्वन्ति निस्वार्थभावान्विताः,
लोककल्याणकर्तुं सदा मानवाः।।
एहि बन्धो त्वरा तत्र गत्वा मुदा।
सर्वदा रामनामामृतं पीयताम्।। 11

# सुखं मन्ये



-डॉ. निरंजनमिश्र:

समायात: पुनस्साकेतमवधेश: सुखं मन्ये
प्रसन्ना पद्मिनी दिननाथमवलोक्याधुना मन्ये।
चतुर्दशवर्षवनवासोऽभवत्त्रेतायुगे बन्धो
चिरात्तम्बूनिवासादागमोऽस्त्यधुना सुखं मन्ये।।
वने दु:खं सुखं कृत्वा स्थिता सीतेति जानीम:
विधे:कृपया हृता सीता स्वयं वा वंचितो राम:।
परं गेहे निबद्ध: केन विधिना नैव जानीम:
विशिष्टे मन्दिरे त्वधुना प्रवेशं सत्सुखं मन्ये
समायात:........।।
हता खरदूषणा बहवो विराधा वा कबन्धा वा
पुनश्शाखामृगैर्बद्धस्समुद्रो वा हता लंका।
त्रियामा सूर्पनखबालेव विकला धावतीहापि
परं नवपुष्पकागमनध्वनिश्रवणं सुखं मन्ये।।
समायात:.......।।
नवेयं लंकिनी बजरंगमुष्ट्यैवाहता मन्ये
स्फुरत्कोदण्डसन्धानत्तरंगेशो नतो मन्ये।
प्रलयकालान्तमेघोत्तालगर्जनमत्तमत्तानां
विनष्टाश्शक्तयस्समरांगने परमं सुखं मन्ये।।
समायात:.......।।

## ।।अयोध्यामहोत्सवम्।।

अभिमतदिनमालक्ष्य यद्धृदयकमलहसनम्।
भवति तदीय फलाकृतिर्नवकवितावदनम्।।
अद्यायोध्यादर्शनं भाग्ये यस्य भवेत्।
तस्य करे पूर्वार्जितं सव्याजं हि भवेत्।।
जयतु जयतु साकेतनिवासी भवनमुपैति हि तम्बूवासी।।
रमणीयेयं नगरी धन्या त्रिभुवनभोगविभूषितमान्या।।
या++सीन्मलिना भावविहीना दुष्टकुठारभयादतिदीना।।
सततविधेश्चरणे पतिता या भाग्यबलाद्दलिता पतिता या।।
धैर्यबलेन हि समययापनं कृतं यया नहि रीतिलंघनम्।।
गता निशा शतखलदलभत्री उदयति काचिद्दरुणिमधात्री।।
साधुजनानामथकायासैरभिमतमाप्तुमनन्तविलासै:।
अभिमतमाप्तवतीयमयोध्या प्रोषितपतिका जाता धन्या।।
घनोदरादुदिता शशिबाला पतति सैकते वारिदमाला।।
शैवालादुदिता नलिनीयं भानोरागमने ह्लालिनीयम्।।
सुधोदधिस्नाता कुलजेयं मलयजसिंचितनववसनेयम्।।
बहुविधरत्नविभावलितेयं सौदामिनीसुभगललितेयम्।।
नवश्रृंगारवती ललनेयं मधुमयभावरचितकलनेयम्।
जयतु नवीनं निर्मितहर्म्यं मधुरकलाकृतिभूषणभव्यम्।
स्वर्णशिखरराजितरमणीयं सुरपतिभवनादपि कमनीयम्।।
सुरमुनिमनुजमनोहरतेयं हरतु सकलदुरितं रचनेयम्।
विजयतु सरयूविमलतरंगो नृत्यति यत्र कमलिनी भृंग:।
मधुमयभावविलासलताया: स्फुरतु कलं सततं कलिकाया:।
समयकुलालरचितनवचित्रं भवतु भवोद्भवभूषणभद्रम्।।
अवधपतेश्चरणाब्जपवित्रं परमानन्दपयोधिवहित्रम्।
परमपावनप्रांगणमेतत् दिशतु विशिष्टचरित्रफलं सत्।
हरतु सदैव मनोजविकारं भरतु शुभंकरपुण्यविचारम्।।
रामराज्यकल्पितसोपानं किरतु कलंकितरोगनिदानम्।।
विहरतु नभसि विशिष्टविहंगा: जनजनहृदये प्रवहतु गंगा।।
जनकसुतापदनखलावण्यं हरतु सदा जनमानसदैन्यम्।।
पतिपदपद्मपरागपरीता या विपिनेऽपि कदापि न भीता।।
रावणमानविमर्दनबीजा जयतु मैथिली पूज्या सीता।।
जयतु लक्ष्मण: खरशरधारी प्रभुपदकमलविपिनमधुहारी।
पवनसुत: प्रहरी खलु यस्या भवितुमिहार्हति किं किल तस्या:।।
जगदानन्दवियोगिनी जगदानन्दपदम्।
लब्ध्वा जगदानन्दजं रक्षतु पुण्यवनम्।।
मर्यादापुरुषोत्तमस्यावासभ्रमणम्।
भवतु सदा भवभूषणस्नेहानन्दकरम्।।

## राम: प्रविशति रे सदनम्

दिनकरकुलभूषणश्रीरामो बाल: प्रविशति रे सदनम्।
नूपुरकिंकिणिकंकणयुगलं मधुरं कुरुते रे रणनम्।।
गगनचराणां करयुगलाभ्यां वर्षति रे कुसुमं
सरयूधारा कलकलतालै: कुरुते नवनटनम्।।
दिनकर.............।।
नवनवचम्पकदीपविलासैर्विहसति रे नगरम्।
पथिकनयनमधुपस्य पिपासा लभते रे शमनम्।।
दिनकर.....................।।
मधुरपवनवेल्लितलतिकाललितं विमलं सदनम्।
चिरकाँक्षितवरमाप्य सतामिह विकसति हृत्कमलम्।।
दिनकर......................।।
कमलदलामलकरचरणाभ्यां ऋजुवक्रं गमनम्।
चलन्गृहीत्वा मधुरमोदकं कुरुते मधुहसनम्।।
दिनकर........................।।
जनजनमानसभावतरंगैराच्छन्नं गगनम्।
जयश्रीरामध्वननविगुञ्जितसततगतौ रणनम्।।
दिनकर................।।

# श्रीरामललास्तोत्रम्



**विद्यावाचस्पति: प्रो. सुन्दरनारायणझा:**
भारतस्य राष्ट्रपतिना महर्षिबादरायणव्यासपुरस्कारेण पुरस्कृत:
आचार्यो वेदविभागे
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:,
(केन्द्रीयविश्वविद्यालय:)
बी-4 कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16

रघुवंशसुवंशपरम्परया नृपजीवनयापनसन्निहितम्।
मुनिवेशसुवेशधृतं शुभदं भज राघवरामललां सततम्।।1।।
भवसागरपारकरं वरदं करुणाकरदिव्यकथानिरतम्।
निजभक्तजनाश्रयदातृतमं भज राघवरामललां सततम्।।2।।
भवतापविनाशकरं सुखदं रमया सहितं रघुनाथवरम्।
सुखशान्तियुतं विमलं वदनं भज राघवरामललां सततम्।।3।।
नितनूतनवैभवदानपरं मिथिलाधिपतेर्दुहितासहितम्।
सशरं धनुष: करयोर्लसितं भज राघवरामललां सततम्।।4।।
अनुजैस्सह शोभितदु:खहरं सरसीरुहकान्तियुतं सरसम्।
भज तत्परमं पदमामरणं भज राघवरामललां सततम्।।5।।
रचनात्मकता सृजनात्मकता जनपालनकर्मकरात्मकता।
दिवसेशसमं रमणं वपुषं भज राघवरामललां सततम्।।6।।
नररूपमनोहरकान्तियुतं जगतारणकारणजन्मभवम्।
सुखराशिममुं कमनीयतमं भज राघवरामललां सततम्।।7।।
गुरुदर्शितमार्गसमाचरणे निजपूर्वजवाक्यसमादरणे।
सततं विनयेन सुसङ्गठितं भज राघवरामललां सततम्।।8।।
असुरैर्निजयज्ञसुरक्षयितुं जनमानसतापविनाशयितुम्।
ऋषिनाथितराजसुतं सदयं भज राघवरामललां सततम्।।9।।
जपयज्ञसुरक्षणकर्मपरं निजकौतुकपाटवशोधरतम्।
वनदानववंशविनाशकरं भज राघवरामललां सततम्।।10।।
पदपांशुकृपा मुनिशापहरा गिरिखण्डसमाम्महिलामकरोत्।
ऋषिशापविमोचकमाध्वनिकं भज राघवरामललां सततम्।।11।।
ऋषिकौशिकदर्शितमार्गपरं बहुदैत्यविदारणकर्मकरम्।
अवधेशसुतं करुणायतनं भज राघवरामललां सततम्।।12।।
दुहितुर्विवहाय वरं चयितुं जनकेन कृतं प्रणमेकमहो।
नृपवाञ्छितकामसुपूर्णकरं भज राघवरामललां सततम्।।13।।
जनकस्य मखं परिपूरयितुं मुनिना सह तत्र शुभागमनम्।
शिवचापसुपूरतनभजमानं भज राघवरामललां सततम्।।14।।
जमदग्निसुतस्य सभागमने सभया कृतवादसमुत्तरणे।
विनयेन मुनेरनलं शमितं भज राघवरामललां सततम्।।15।।
मुनितोषकरं भषणं मधुरं मिथिलेशमखं परिपूर्णकरम्।
जनरञ्जनकार्यकरं सुखदं भज राघवरामललां सततम्।।16।।
सुतसौर्यकथामवधस्य नृपो निजभृत्यमुखाच्छ्रुतवाञ्चलित:।
वरयात्रिभिरावृतराजसुतं भज राघवरामललां सततम्।।17।।
ग्रहयोगसुलग्नविचारयता तनया प्रणयो जनकेन कृत:।
श्रुतिसम्मतकार्यपरं धनिनं भज राघवरामललां सततम्।।18।।
जनकस्य सुयज्ञमिमं समये परिपूर्णकरं रघुवंशमणिम्।
सफलीकृतदारपरिग्रहणं भज राघवरामललां सततम्।।19।।
निजपैतृकदेशमभीष्टकरं समुपासितसर्वगुणैस्सहितम्।
जनकात्मजया सहितं सुखदं भज राघवरामललां सततम्।।20।।
अवधेशसुघोषितराजपदं परिवर्तितमेव क्षणे सहसा।
मनसा विमलेन समाचरितं भज राघवरामललां सततम्।।21।।
वनगन्तुमवाप्य पितुर्वचनं समनुष्ठितमाश्वविचारकृतम्।
ध्वजवाहकधर्मपथश्चरणं भज राघवरामललां सततम्।।22।।
अनुजैस्सहशोभितरामपदं जनकात्मजया सहितं वरदम्।
गुरुवाक्यसुपालकमाकृतिकं भज राघवरामललां सततम्।।23।।
बहुहर्षितमानसमूर्त्तिरयं समुपेत्य सुमङ्गलगाङ्गतटम्।
निजभक्तसुमङ्गलकामभवं भज राघवरामललां सततम्।।24।।
तटवासिसु मोदकरं निरतं सुखराशिसमुद्भवरूपधरम्।
सुहृदां सकलेप्सितपूर्णकरं भज राघवरामललां सततम्।।25।।
विचचार वनेष्ववलोकयितुं ऋषिभिर्मुनिभिस्सहितां सुषमाम्।
मुनिपादसुसेवकचारुतरं भज राघवरामललां सततम्।।26।।
ऋषयो मुनयश्च वसन्ति वने विलसन्ति सुभक्तजना बहव:।
मुनिपुङ्गवलब्धधनं विमलं भज राघवरामललां सततम्।।27।।
वनकौतुकदर्शनकामपरो रमणार्थमगात्खलु पञ्चवटीम्।
रममाणममुं रघुनाथवरं भज राघवरामललां सततम्।।28।।
द्विजदेवमुनीनभिरक्षयितुं दनुपुत्रविनाशनकर्मपरम्।
मनसा वचसा कृतसाधुकृतं भज राघवरामललां सततम्।।29।।
असुरान्विनिहत्य वने च बहून् मुनिवृन्दसुरेप्सितकर्मकरम्।
ऋषिदत्तबलातिबलासहितं भज राघवरामललां सततम्।।30।।
शबरीगृहमेत्य चितं बदरीफलभोगरतं सुखधामनिधिम्।
खरदूषणरावणदण्डकरं भज राघवरामललां सततम्।।31।।
मुनिबोधितसाधुतरं वचनम्।
परिपालनतत्पर

# भज सखे सदा राममद्वयम्



-डॉ.शैलेशकुमारतिवारी


दशरथात्मजं सन्तमप्यजं
विबुधवृन्दवन्द्यांघ्रिपंकजम्।
सुलभसच्चिदानन्दमालयं
भज सखे सदा राममद्वयम्।।1।।
नवलनीलनालीकसन्निभम्
अमितकोटिभास्वल्लसद्विभम्।
सकलसात्वतामेकमाश्रयं
श्रय सखे सदा राममद्वयम्।। 2।।
कमललोचनं पापमोचनं
विहतशोचनं रम्यरोचनम्।
अमिततेजसं मङ्गलालयं
भज सखे सदा राममद्वयम्।।3।।
विजितकोटिकामं स्मिताननं
सुकृतिकामितं सत्सनातनम्।
परमपूरुषं सत्यचिन्मयं
श्रय सखे सदा राममद्वयम्।।4।।
अतुलशीलशोभामनोबलं
नवमृणालिकारादिकोमलम्।
ददतमीश्वरत्वं तथाऽभयं
भज सखे सदा राममद्वयम्।।5।।
भुवननायकोऽमोघसायको
धरणिधायकोऽरातिभायक:।
दयितदायकस्तं शिवाशयं
श्रय सखे सदा राममद्वयम्।।6।।
भवविभञ्जनं लोकरञ्जनं
दनुजगञ्जनं भक्तसञ्जनम्।
परनिरञ्जनं सन्निरामयं
भज सखे सदा राममद्वयम्।।7।।
समुचिताद्वयादर्शदर्शकं
विधृतधर्मकं काम्यकर्मकम्।
विमलमर्मकं स्वच्छनिश्चयं
भज सखे सदा राममद्वयम् ।। 8।।
सहजसज्जनं सभ्यसज्जने
प्रकुपितान्तकं दुष्टदुर्जने।
कुशलशासकं क्षीणसंशयं
श्रय सखे सदा राममद्वयम् ।।9।।
अवहित:सदा दोषवर्जने
प्रयततत्पर:सद्गुणार्जने।
सरलवृत्तिकं दुर्गुणक्षयं
भज सखे सदा राममद्वयम् ।।10।।
विनयतो नतो वित्तमागमे
कुलिशकायको वीरसंगमे।
प्रबलनीतिकं तं सदाजयं
श्रय सखे सदा राममद्वयम् ।।11।।

नृपतयोऽग्रजन्मादयोऽथवा
सशबरीनिषादादयोऽथवा।
समदृशं सदोदात्तनिर्णयं
भज सखे सदा राममद्वयम् ।।12।।
नहि कुलं न जातिं न रैयशो
लषति भक्तिकर्मार्पणं तु स:।
लसदुदारभावं द्रवद्दयं
श्रय सखे सदा राममद्वयम् ।।13।।
सुलभराज्यसौख्यं हि दुस्त्यजं
रहयतो न खिन्नं मुखाम्बुजम्।
विततकीर्तिकेतुं शुभोदयं
भज सखे सदा राममद्वयम् ।।14।।
जपति यो हृदा रामनाम कौ
भवति भुक्तिमुक्त्यादिभागसौ।
स्मर हरेश्वरं तं सुधारयं
श्रय मनस्सदा राममद्वयम् ।।15।।
रट मन: सदा राममद्वयं
जप मन: सदा राममद्वयम् ।
स्मर मन: सदा राममद्वयं
भज मन: सदा राममद्वयम् ।।16
भवति सन्मती रामनामतो
भवति सद्गती रामनामत: ।
भवति ना सुखी रामनामतो
जगति को विना रामनामत:।।17

'जयति तेऽधिकं जन्मना व्रज:' इति गोपीगीतवद्त्र कामचारिणी छन्द:, तल्लक्षणञ्च- 'नररलाश्च ग: कामचारिणी' इति । अस्य छन्दसो वृत्तस्य वा अन्यान्यपि कनकमञ्जरी (कनकमञ्जरी नश्च रौ लगौ)-इन्दिरा (नररलैर्गुराविन्दिरा मता)-सम्मता (नररलाश्च ग: सम्मता मता)-राजहंसिका-राजहंसी-मनोरमा-ललितादीन्यनेकानि नामानि सन्ति। प्राचीनेयं रचना पूर्वं प्रेषितापि पुन:
नमस्ते रामचन्द्राय नमस्ते निखिलात्मने।
नमस्ते सर्वसेव्याय नमस्ते परमात्मने।।

## भजनगीतम्

मनो भज रामनाम भवसारम् ।
जननमरणमयदुस्तरकवनं तर कृपारमपारम्।
अभिरामं पूरितसमकामं दैन्यदनुजदलदारम्।
परिहर दुर्गुणगणपरिवारं कुरु सुतरामुपकारम्।
मरुभूमाविह नहि रसलेश: श्रय शाश्वतसुखकारम्।
दु:खं मायाजालमतो नो सर संसारमसारम्।
कलिमलपङ्कं त्यक्त्वा पालय दिव्याचारविचारम्।
कुरु समवञ्चननीतिनिवारं हर परपीडाभारम्।
अवरुन्धि शुभकर्मविरोधक- सुरसावदनविवारम्।
मा परिभव परजनमसहायं चर चरिचयपरिचारम्।
परिचिर हरिचरणं भुवि शरणं कुरु सज्जनसहचारम्।



-शशिपालशर्मा 'बालमित्र'

पुनरपि भव्या भवति अयोध्या
राममन्दिरं भव्यतरम्।
जगज्जननी सीताऽऽयाति
पश्य तया सह रामवरम्।।

भव्यमन्दिरे रामदर्शनं
रामदर्शनं कणे-कणे।
छिन्नं सर्वं जगद्बन्धनं
रामस्मरणं क्षणे-क्षणे।।

तस्य लीलया सकलं भुवनं
सृष्टि: सर्वा तस्य कला।
जयतु अयोध्या नगरी भव्या
जयतु जयतु श्रीरामलला।।

## राघवः

डॉ. विशनलालगौड़ः
'व्योमशेखरः'
पूर्वप्राचार्यः अतर्रामहाविद्यालयः,
बांदा, (उ०प्र०)

वीता निशा भाति शुभं प्रभातम्
नीडं विमुञ्चन्ति खगा विनिद्राः।
गायन्ति गीतं च खमुत्पतन्तो
हे राम रामेश्वर राघवेति ॥ 1 ॥
बालार्कभासा कनकाभकान्तिः
प्राची दिशा भाति विभावतीयम्।
गायत्युषा देव्यपि रामसूक्तम्
हे राम रामेश्वर राघवेति ॥ 2 ॥
गुञ्जन्ति पद्मेषु मिलन्मिलिन्दाः
तन्त्रीस्वनं चाभिनदन्ति कामम् ।
गायन्ति रामं च मनोऽभिरामं
हे राम रामेश्वर राघवेति ॥ 3 ॥
प्रातः समीरेण विनर्तिता ये
वल्लीवितानास्तरुपल्लवाश्च ।
कुञ्जेषु गुञ्जन्ति नदन्ति हृद्यं
हे राम रामेश्वर राघवेति ॥ 4 ॥
गावश्च वत्सा अथ गोपबालाः
वंशीधरं चापि धनुर्धरन्तम् ।
गायन्त्यनन्तं तमनन्तरूपम्
हे राम रामेश्वर राघवेति ॥ 5 ॥
आनीय चाङ्कं सुतमात्मरूपं
वात्सल्यमूर्तिं जननी तु कापि ।
पुत्र प्रगायेति गृणाति कर्णं
हे राम रामेश्वर राघवेति ॥ 6 ॥
काचिद् वरेण्या गृहिणी सुनन्दा
नत्वा प्रभाते सवितारमीड्यम् ।
सीतेशमीशं भजते ऽभिरूपं
हे राम रामेश्वर राघवेति ॥ 7 ॥
अन्या त्वनन्या शबरी वदान्या
ब्रूते पतिं स्वं प्रियमात्मकामम् ।
रामाभिधं गाय हरिं सखे त्वम्
हे राम रामेश्वर राघवेति ॥ 8 ॥
काचित्तु सीतेव चरित्रगीता
प्रातः पतिं प्राप्य गिरं गृणीते ।
प्राणेश गाय प्रिय राममीशं
हे राम रामेश्वर राघवेति ॥ 9॥
कान्तस्तु कोप्यङ्कगतां स्वकान्ताम्
प्राह प्रिये त्वं प्रतिमुञ्च शय्याम्।
एहि प्रगायाम हरिं प्रियं तम्
हे राम रामेश्वर राघवेति ॥ 10 ॥
ब्राह्म मुहूर्ते श्रुतिगानपूते
स्वध्यायशीला बटवः सुशीलाः।
विद्याप्रदं मन्त्रमिमं मनन्ति
हे राम रामेश्वर राघवेति ॥ 11 ॥
मन्दाकिनीतीरवनान्तवासाः
सन्तो महान्तो गिरिचित्रकूटे।
ध्यायन्ति गायन्ति निशावसाने
हे राम रामेश्वर राघवेति ॥ 12 ॥
निद्रां विहायाथ नराश्च नार्यः
सद्यः क्रमन्ते परि कामदाद्रिम् ।
कुर्वन्ति तारं जयरामघोषम्
हे राम रामेश्वर राघवेति ॥ 13 ॥
कोलाः किराताः शबरा निषादाः
धन्याः सखायो रघुनाथभक्ताः ।
आयात गायाम वने वसन्तम्
हे राम रामेश्वर राघवेति ॥ 14 ॥
. भद्रा जना रे हरिभक्तिरक्ताः
सख्यः सखायः समुपेत सद्यः।
गायाम माङ्गल्यकरं प्रगीतम्
हे राम रामेश्वर राघवेति ॥ 15॥
उत्तिष्ठतार्यास्त्यजत प्रमादम
आतिष्ठतार्याः शुभकर्मजातम्।
गायत्रमुद्गायत राममन्त्रम्
हे राम रामेश्वर राघवेति ॥ 16 ॥
धन्या धरा राघवजन्मदात्री
रामायणी काव्यगिरा च धन्या।
धन्यं परं रामरमेशगीतम्
है राम रामेश्वर राघवेति ॥ 17 ॥
प्रातस्तनं राघवकीर्तनं यद
गेयं प्रिये योसगिरा प्रणीतम्।
श्री रामभद्रार्पितमस्तु तद् वै
हे राम रामेश्वर सध्वेति ॥18॥

## रामचरितामृतं सर्वदा सेव्यताम्

-डॉ. रामानन्द शुक्लः
अयोध्याधाम

आनन्दोसौ परब्रह्म: सर्वदः सुखसागरः।
सीतायाः हृदयानन्दः कृपासिन्धुर्गुणाकरः॥
श्रीरामः ध्येयगेयश्च महामंगलकारकः।
शोषकः शोकलोकस्य साधककलेशकालकः॥
कलिकालमलध्वंसी भक्तभक्तिविवर्धकः।
धनुर्बाणं करे धृत्वा खलानां खलु बाधकः॥
सर्वशक्तिप्रियो रामः दयादाक्षिण्यविग्रहः।
दीनबन्धुः कृपानाथः दोषदारिद्र्य निग्रहः॥
सुजनश्च सुरश्रेष्ठ:योगिचित्तसमर्चितः।
लोकालोकपतिः श्रीमान् नीतिज्ञेषु सुपूजितः॥
सर्वज्ञः सारसर्वस्वः सर्वजीवसमाश्रितः।
सौन्दर्यानन्ददेवेशःवैदेह्याः प्रीतिपालकः॥
कन्दर्पकोटिलावण्यःकोटिकन्दर्पदर्पहा।
पुराणः पुरुषः श्रेष्ठः प्रपन्नानां शुभप्रदः।
धर्मज्ञः राघवः श्रीलःकोविदोवेदवन्दितः।
परिपूर्णश्चिदानन्दःप्राणेशः निखिलात्मकः॥
रंजकः सिद्धसाधूनां प्रजानां परिपालकः।
भंजकः षड्विकाराणां सुध्युपास्यश्च सर्वदा॥
शक्ताशक्ताश्रयःरामःरमते योगिनां हृदि।
जानक्या सह आगच्छ हृदयाम्बुजमाश्रय॥
क्षमस्व मम दौरात्म्यं देहि मे शरणागतिम्।
भक्तमानससंवास माधुर्यरसपेशल॥
गंधाक्षतैरुपचारैर्नजानामि तवार्चनम्।
शब्दांजलिं तु नैवेद्यं स्वीकुरुष्व सुखावह॥
देवाधिदेववन्द्यस्य राघवस्य सुलक्षणम्।
सीतायाः लोककान्तायाः चरितं लोकपावनम्॥

## श्रीरामश्शरणं मम



रात्रिन्दिवमहो जनस्य मरणं सम्पठ्य वार्तामिमां
ज्ञात्वा भीतमना भयेन भवने दूरेक्षणे प्रत्यहम्।
नेतृणां शठतां ह्यसौ सुरधुनी पूता मला चाधुना
रामं दाशरथिं स्मरामि सततं सर्वत्र यस्माच्छिवम्॥१॥

-महाचार्यः मनतोषः
भट्टाचार्यः

श्रीरामो भगवाञ्जनान् यदि सदा देशे महाभारते
सत्यं पाति तदा कथं नरगणा रोगादिनानासुखम्।
भुक्त्वा हीनबलाः कृतान्तवशगास्सन्तो म्रियन्ते हठा-
च्छ्रीरामश्शरणं गतोऽपि मरणं रोगादिभी राघव:॥२॥
सोऽनन्तोऽन्तदिने सुरक्षति चिरं चित्ते न मेऽप्रत्ययो
जीवत्कालमसौ च पाति विवदे नाहं नरं धर्मतः।
सोढ्वा किन्त्वसुखञ्च तापविविधं तातो न मां रक्षति
वच्म्यप्रत्यययुग्जनोऽहममलञ्चोक्त्वा प्रभुं निन्दति॥३॥((युग्मकम्))॥
धन्योऽहं यदि सर्वदोषगुणविद्रामो बुधानां मुखाद्
वाक्यैः रूढतमैर्हि पीडयति मां दुर्बुद्धिमन्तं सुतम्।
रामो न्यायपरोऽधुनापि ददते दुष्टाय दण्ड ध्रुवं
मत्वा हीनधियञ्च मापथगतं शास्ति प्रभुः पण्डितैः॥४॥
रामो मां यदि शास्ति सदैव धरणौ दत्तेऽसुखं सर्वदा
हा मां रामरमा प्रशास्ति ह्यपि चेद्दृष्ट्वा क्वचिद्भ्रंशनम्।
भीतः स्वामिकरस्य पीडनमहो गौर्याति चेत्पालिकां
सा बध्नात्यथ गौरहं हतबलः कुर्वे क्व गोजन्मनि॥५॥
मन्ये नो जननं पुनश्च मरणं जन्मान्तरावर्त्तनं
सौख्यं प्रीतिकरं भुवाञ्च भवतो वंशे सतां सन्ततम्।
सन्तः प्राज्ञजनाः सदा कथमहो काङ्क्षन्ति मुक्तिं परां
विष्णोः पादयुगं सदैव विमलं जन्मादिबाधाकरम्॥६॥
चेष्टे देव लिखामि दुर्गमतमैः क्लिष्टैः पदैर्दुर्लभैः
पद्यं भो भगवन् पदं भवति नो ज्ञेयं बुधैर्हा कथम्।
पद्यं पूर्णतमं लिखामि न बुधैर्ज्ञेयं चतुर्भिः पदै-
स्त्यक्त्वा काव्यपदं पदं हि भवतस्तस्माद्भजे साम्प्रतम्॥७॥
रामं यो भजते प्रणौति मनसा वाचा तथा कर्मणा
मूर्खो वा यदि वाधनो मलयुतो व्रात्योऽन्त्यजः पामरः।
रामो भक्तिपरायणं निजजनं मत्वा प्रियं बान्धवं
नित्यं रक्षति तं त्रितापविपदस्तातो यथा ह्यात्मजम्॥८॥
यो योद्धा कृतवान् दशास्यशमनं युद्धे पुरा हेलया
योऽयोध्यानगरीमवाप्य कृतवान् मुक्तान् भयाच्चाश्रितान्।
रामं दाशरथिं तमाश्रितजनः कुर्वे नमश्श्रद्धया
स्वामिन्नो कुरुतां पदाश्रितजनञ्चेमं कदा वञ्चितम्॥९॥
बाङ्गोऽहं ननु नाङ्गदः कविरहं नाहो कपिर्नो नलः
सामान्योऽस्मि नरो विभीषणनुत स्वामिन् क्व माभीषणम्।
सुग्रीवं न विचार्य चौकवदनं मत्वा दशास्यं पुनर्-
नित्यं तापशरैर्निपीड्य तुदसे किन्ते महत्त्वं ततः॥१०॥

## मर्यादापुरुषोत्तमः श्रीरामचन्द्रः

-आचार्य चन्द्रशेखरशर्मा

रामचन्द्रस्य मर्यादा,लोकोत्तरा गरीयसी।
सर्वगुणसमापन्ना,सर्वसंस्कारशोभिता॥ 1
मातुः मानस्य मर्यादा,पितुः वचनस्य पालनम्।
भ्रातृणां प्रेममर्यादा,गुरोः कथनस्य धारणम्॥ 2
भार्याधर्मस्य मर्यादा,भार्याकष्टस्य मोचनम्।
दासीमानस्य मर्यादा,अपमानस्य सर्जनम्॥ 3
प्रजाधर्मस्य मर्यादा,प्रजादुःखस्य दाहनम्।
प्रजाप्रीतेश्च मर्यादा,यथा राजा तथा प्रजा॥ 4
महायज्ञस्य मर्यादा,दुष्टानां दलने ननु।
यज्ञधर्मस्य मर्यादा,मर्यादा शत्रुनाशने॥ 5
मित्रमानस्य मर्यादा,सुग्रीवस्य च रक्षणम्।
बालीवधस्य मर्यादा,अंगदस्य च रक्षणे॥ 6
ऋषीणां मानमर्यादा,विश्वामित्रस्य दर्शने।
ऋषीणां आश्रमे गत्वा,मर्यादाधर्मधारणम्॥ 7
शबरीप्रेममर्यादा,जटायुप्राणसर्जनम्।
हनुमद्भक्तिमर्यादा,कपिसंकल्पधारणम्॥ 8
विभीषणस्य मर्यादा,मर्यादा दूतरक्षणे।
रामभक्तौ च मर्यादा,मर्यादा रिपुनाशने॥ 9
सीतायाः मानमर्यादा,रावणमानमर्दने।
सीतासंकल्पमर्यादा,कपिप्रेमप्रसारणे॥ 10
प्रासादे कानने युद्धे,चित्रकूटे तपोवने।
मर्यादा दृश्यते नूनं,आश्रमे चौव सागरे॥ 11
शैशवे चौव बाल्ये वै,यौवने ननु जीवने।
रामस्य खलु मर्यादा,प्राणिनां हितसाधिका॥ 12
नृपे दशरथे नित्यं,सर्वासु चौव मातृषु।
गुरौ मित्रे च भार्यायां,रिपौ दास्यां च भ्रातृषु॥ 13
संवादे ननु रामस्य,पिनाकस्यैव भङ्गमे।
जनकस्य च संकल्पे,मर्यादा मंगला हिता॥ 14
दिव्या रामस्य मर्यादा,भव्या श्रेष्ठा मनोहरा।
मर्यादामन्दिरं दिव्यं,अयोध्यायां सुशोभते॥ 15
मर्यादा मानवैः नित्यं,धारणीया च जीवने।
मर्यादा वर्धतां लोके,चन्द्रस्य शुभकामना॥ 16

## आगतो रामराजा



डॉ.शशिकान्त तिवारी 'शशिधरः'

आगतो रामराजा ह्ययोध्यापुरीं
वाद्यतां ढोलवाद्यं प्रभोस्स्वागते॥
जन्म धन्यञ्च नः धन्यभाग्या वयं
दिव्यदृश्यं सुपश्याम एतद्ध्रुवम्।
गीयतां नृत्यतां दीपको ज्वाल्यतां
वाद्यतां ढोलवाद्यं प्रभोस्स्वागते॥01॥
आगतो रामराजा..................
आहुतिं दत्तवन्तोत्र नैके जनाः
कारसेवारता धर्मसंरक्षकाः
भाग्यतो निर्मितं भव्यसन्मन्दिरं
वाद्यतां ढोलवाद्यं प्रभोस्स्वागते॥02॥
आगतो रामराजा..................
टेन्टमध्ये कथं पूज्यते स्म प्रभुः
ग्रीष्मशीतातपादीनि सोढ्वात्र हा!
सोचयित्वा मनो वेपते हे सखे!
वाद्यतां ढोलवाद्यं प्रभोस्स्वागते॥03॥
आगतो रामराजा..................
मातुराज्ञामवाप्येह त्रेतायुगे
दुर्जनानां प्रभावात्कलावाप्यहो!
दु:खपीडाश्च सोढ्वागतो मे प्रभुः
वाद्यतां ढोलवाद्यं प्रभोस्स्वागते॥04॥
आगतो रामराजा..................
एक आसीच्च लंकानरेशस्तथा
स्यात्खरो दूषणो मेघनादोथवा।
किन्तु नैके कलौ राक्षसा मानवाः
वाद्यतां ढोलवाद्यं प्रभोस्स्वागते॥05॥
आगतो रामराजा..................
रावणस्येह सत्ता गता हस्ततः
सत्यमेतद्धि रामे वने संस्थिते।
तद्वदत्रापि जातं स्वदेशेधुना
वाद्यतां ढोलवाद्यं प्रभोस्स्वागते॥06॥
आगतो रामराजा..................
स्याद्धर्मो जितो नैव त्रेतायुगे
द्वापरे नो सते नो कलौ निश्चितम्।
दृश्यतां भोः! जयं याति धर्मः पुनः
वाद्यतां ढोलवाद्यं प्रभोस्स्वागते॥07॥
आगतो रामराजा..................
रामराज्यं पुनर्भारते चागतं
भक्तिभावैस्सुयुक्तास्त्ययोध्यापुरी।
रामरामेति संश्रूयते सर्वतो
वाद्यतां ढोलवाद्यं प्रभोस्स्वागते॥08॥
आगतो रामराजा.....................
पूज्यवाल्मीकिनाम्ना विमानस्थलं
रामनाम्ना विमानस्य नामाभवत्।
पूज्यरामायणं गीयते सर्वतः
वाद्यतां ढोलवाद्यं प्रभोस्स्वागते॥09॥
आगतो रामराजा.....................
स्वर्गतो देवताः पुष्पवृष्टिं शुभां
संविधास्यन्ति द्वाविंशतौ भूतले।
तेवतीर्येह नृत्यन्ति गास्यन्त्यहो!
वाद्यतां ढोलवाद्यं प्रभोस्स्वागते॥10॥
आगतो रामराजा.....................
सूर्यवंशाधिपत्ये हि सूर्योप्यहो
नैजदिव्यप्रकाशं प्रदास्यत्यहो!
रात्रिकाले शशी नृत्यतीत्यात्मना
वाद्यतां ढोलवाद्यं प्रभोस्स्वागते॥11॥
आगतो रामराजा.....................

## शमयतु नो दुरितं श्रीरामः



-डा. सञ्जयकुमारचौबे

वैदेहीमृदुहृदयस्पन्द
पद्मलोचनः परमानन्दः।
नियतं त्रिभुवनमङ्गलकर्ता
सुकुमारो नवमेघश्यामः॥1॥
शमयतु नो दुरितं श्रीरामः।
सामर्षं रिपुदलबलहारी
मुदितः सन् सज्जनसुखकारी।
उज्जवलगुणगणलोकादर्शस्
तेजोमूर्तिर्लोकललामः॥2॥
शमयतु नो दुरितं श्रीरामः।
दुरवस्थाद्रुतनाशनशक्त
भक्तगणेष्वविरतमनुरक्तः।
भूतिदानकर्मणिकुशलोऽसौ
सकलोपद्रवसङ्घविरामः॥3॥
शमयतु नो दुरितं श्रीरामः।

# देशस्य गौरवं राममन्दिरम्



डॉ. राजकुमारशाण्डिल्यः
हिन्दी-प्रवक्ता
शिक्षा-विभागः चंडीगढ़

श्रीयुत आडवाणी यदाचलत् सोमनाथतः।
अयोध्यां रथमारुह्य नरेन्द्रस्तस्य सारथी ।।1।।
नरेन्द्रस्यैव नेतृत्वे जोशी महोदयस्य च।
रथं कन्याकुमारीतः काश्मीरे उत्तरे गतः ।।2।।
प्रत्यावर्तनयोध्यातो रेलयानेन गोधराम्।
हिंस्रैश्च मुस्लिमैरग्नौ दग्धाश्च कारसेवकाः ।।3।।
जना एकोनषष्टिर्ये दग्धा भक्ताश्च भीषणे।
हिन्दू-मुस्लिमयोरस्यां हिंसायां बहवो हताः ।।4।।
आरम्भो जन्मभूमौ हि श्रीराम मन्दिरस्य वै।
अयोध्यायामपूर्वोऽद्य ह्युल्लासो दृश्यते नृषु ।।5।।
असंख्यैश्च जनैर्दत्तमान्दोलने नु जीवनम् ।
धन्यास्ते बलिदानं यैर्राष्ट्राय स्वं समर्पितम् ।।6।।
न्यायालयेषु वर्षेभ्यो विवादस्य हि निर्णयः।
मन्दिरस्य शिलान्यासो नो देशस्यास्ति गौरवम् ।।7।।
दयालुर्वत्सलो भद्र ईशश्च सर्वदः प्रियः।
स हृदयेऽस्मदीये हि श्रीरामो रमतां सदा ।।8।।
त्रेतायामवतारो हि विष्णोर्रघुकुले पुरा।
दुष्टसंहारकश्चासौ धर्मसंस्थापकस्तथा।।9।।
जानकी वल्लभो रामो वनवासी धनुर्धरः।
हि दृढप्रतिज्ञश्चासौ शरणागतवत्सलः।।10।।
धैर्यं शौर्यं दया शौचं पितुरादेशपालनम्।
औदार्यं संयमं स्नेहो बन्धुसहायकस्तथा।।11।।
राम-रामेति मन्त्रस्य कर्णयोर्मधुरा ध्वनिः।
चित्ताह्लादं करोत्येव नवमूर्जां ददाति च।।12।।
चित्ते बालस्वरूपं ना निधाय ह्युत्सवे मुदा।
कौशल्यानन्दनं रामं भजति भूतये सदा।।13।।
दुष्ट संहारकं देवं मंगलकारकं तथा।
पुरुषोत्तममाराध्यं चित्ते ध्यायाम्यहं सदा।।14।।
सूर्यस्य शिव-पार्वत्योर्गणेशस्य च मोहकाः।
चित्राण्युट्ट ङ्किकतान्यत्र भित्तिषु विविधानि हि।।15।।
हि सरयूतटे स्नानं प्रभोध्यानं पुनाति नः।
खाद्य दानं तथा पेयं निर्धनेभ्योऽस्ति पुण्यदः।।16।।
आगतेयं शुभा वेला दीर्घकालात् प्रतीक्षिता।
श्रीरामस्य करिष्यामो दर्शनं हृदि लालसा ।।17।।
अद्य राममयं विश्वमयोध्या हर्षिता भृशम्।
निर्माणं जन्मभूमौ हि मन्दिरस्य भविष्यति ।।18।।
नगरे पुष्पवृष्टिश्च दीपमाला गृहेषु वै।
भक्ता इच्छन्ति रामस्य दिव्यं भव्यञ्च मन्दिरम्।।19।।
नृत्यन्ति मोदमानाश्च गायन्ति मानसं जनाः।
स्वप्नोऽद्य रामराज्यस्य पूर्णस्तथाद्भुता पुरी।।20।।
मन्यन्ते जीवनं धन्यं द्रक्ष्यामो मन्दिरं वयम्।
प्रशंसन्ति स्वभाग्यन्ते रामस्य महिमाद्भुता ।।21।।
कपाटा मण्डपा स्तम्भा शोभन्ते मनमोहकाः।
विशिष्टा शिल्पिनो दक्षा मन्दिरशिल्पमद्भुतम् ।।22।।
दुर्बुद्धि यवनैःपूर्वं मन्दिरध्वंसनं कृतम्।
तदा मस्जिदनिर्माणं कालुष्यं हृदि दृश्यते।।23।।
विद्वद्भिः रामभक्तैश्च नेतृभिःबौद्धिकैस्तथा।
संघर्षं फलदो जातो दीपोत्सवक्षणं भुवि ।।24।।

---



-डॉ. सत्येन्द्रपाण्डेयः
सहायकाचार्यः संस्कृतविभागः
जगजीवनमहाविद्यालयः,
आरा, बिहारः

हे राम! अयोध्यायां पुनरेत्य विराजस्व।
छलछद्मशत्रुभावं त्वरितं नाशयस्व।
हे राम....
1.सीतासहितं श्रीमन्! भ्रातासहितं भगवन्!
हनुमत्सहितं राघव! आगत्य विराजस्व।
हे राम....
2.भारतभूमौ भगवन्! अनयाः विवर्धन्ते।
निजस्वार्थसाधने हि मनुजाः विलोक्यन्ते।
निजमर्यादां ब्रह्मन्! एनान् शिक्षयस्व।
हे राम.......
3.कथने करणे राघव! भेदो हि महानस्ति।
विश्वासभाजनः कः सम्यग्न भानमस्ति।
त्वं सत्यप्रतिज्ञायाः मार्गं निर्दिशश्व
हे राम....
4.मातापित्र्योः सेवां विरलाः प्रकुर्वन्ति।
जाते वृद्धे तेषां वचनं हि शृण्वन्ति।
त्वं पुत्रधर्ममर्म सर्वान्दर्शयस्व।
हे राम....
5.भ्रातरो विवाहान्ते प्रायशो विरुध्यन्ते।
भार्यामुखमालोक्य सर्वं निर्धारयन्ते। ।
सम्बन्धगतं स्नेहं सम्यग्विबोधयस्व।
हे राम....

# श्रीरामः



प्रो.(डॉ.)अजितकुमारजैनः,

विश्वे वसुधा भारतवर्षम्
दिवलोक ललाम-सदा ललितम् ।
इतिहास प्रसिद्ध सदा सिद्धम्
विश्वे विश्रुत-शुभ रघुवंशम् ।। 1।।
सरिता सरयू नित पापहरम्
पुरपट्टन कौशलपुर कथितम्।
त्रेता जातम् उपकार-कृतम्
रघुनाथसुतम् प्रणमाम्यहम् ।।2।।
राघव-राघव रघुवंशसुतम्
दशरथ-नन्दन आनंदप्रदम् ।
माताकौशल्या मोदकरम्
शुभदं सुखदं प्रणमाम्यहम् ।। 3।।
कौशिकनन्दन सार्द्धमं गमनम्
कण्टकरहितम् उपकारकृतम्।
दुष्कृतकर्ता असुरहननम्
जय-जय श्रीराम प्रणमाम्यहम् ।।4।।
संतप्तं जनकं तृप्ती कृतम्
सीता-परिणय मिथिलाधिपतिम्।
जय-जय-जय सीताराम कृतम्
मधुरं मिलनं प्रणमाम्यहम् ।।5।।
मर्यादापुरुषोत्तम कथितम्
उपकारकृतम् चित्तं व्यथितम्।
धारित-लोकोत्तर-आचरणम्
जय-जय श्रीराम नमाम्यहम् ।।6।।

# श्रीरघुनाथपदवन्दनम्



डा. विपिनकुमारद्विवेदी
पीसीपी-इंटर-कॉलेज
हुसैनगंज, फतेहपुरम्

रघुनाथपदं चलचित्त भज
प्रविहाय न कोपि भवे शरणम्।
सुखधामविरामविपद्विमलम्
भवसिंधुविशालमहत्तरणिम्।।१।।
अभिराममतिः प्रभुरामसुधीः
ऋषिवृत्तचरो मुनिहोमनिपः।
गुरुभक्तिधरः सुयशोमहितः
मम राघवरूपमनूपमहो।।२।।
प्रियजानकि याहि मया सह न
बहुहिंसकजीवभयं च वने।
शृणु नाथ विना त्वदृते जगति
नहि कोपि विभाति न कोपि मम।।३।।
पृथिवीतनये सुखसर्वमिह
परिवारजना निवसन्ति समे।
अटवीसकलं बहुकष्टभृतम्
क्व च कोमलदेहमिदं तव भोः।।४।।
रघुवंशमणे शृणु हे प्रणव
न मनो मम वांछति किंचिदपि।
भवता सह मे वसनं प्रिय हे!
नहि राजसुखं परिवारसुखम्।।५।।
जगति प्रथितो बुधवृंदवरः
निजसंस्कृतिगौरववृद्धिकरः।
सुरवाक्परिसेवनदत्तमनाः
मदनो ननु मोहनमालवजः।।६।।
शृणु राघव रक्षसि सर्वजगत्
त्वमिहासि च लोकपतिः परमः।
तव संगतिमाप्य मनो ससुखम्
न वने मम किंचिदपि प्रभयम्।।७।।
बहुकंटकजालयुता वनभूः
विषमा च नतावनता बहुधा।
कमठोपमरूक्षविमार्गपरा
गमने पदपंकजयोर्न वरा।।८।।
त्यज हे हृदये हठतां गमने
विजनं च वनं बहुदुःखकरम्।
जनको हि पिता तव किं कथनं
तनयापि गता सदनात्तु वनम्।।९।।
जननी तव जानकि वक्ष्यति किं
रविवंशमहः क्व च कार्यमिदम्।
तनया हि सकष्टमियं तु मया
विभृता नहि वेत्ति जनो जगति।।१०।।



# जैनागमेषु जन्मभूमि-अयोध्यायाः वैभवम्

-आचार्य-अनेकान्तकुमारो जैनः
जैनदर्शनविभागः ,दर्शनसंकायः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,
नवदेहली-16





संस्कृतप्राकृतपालीभाषाभारतवर्षस्य गौरवम् ।आसु भारतीयजनमानसस्य ,मनन-चिन्तनानि, अनुभूतयश्च सन्निहिताः सन्ति।अत्र भारतीयसंस्कृतेः दार्शनिकचिन्तनस्य, संस्कारस्य, विज्ञानस्य, राजनीतेः समाजनीत्यादेश्च मार्मिकी अभिव्यक्तिर्भवति । वयम् सर्वे जानीमः यत् वैदिकपरम्परायाः विशालं वाङ्मयं समस्तासु विधासु उपलब्धं प्रसिद्धञ्चास्ति किन्तु संस्कृतप्राकृतजैनसाहित्यस्य समृद्धपरम्परायाः विषये प्रायः साहित्यिकजनाः अपरिचिताः सन्ति।

जैनसंस्कृतप्राकृतसाहित्ये किं वा अस्ति? इति बहवः विद्वान्सः पृच्छन्ति । यद्यपि एषः प्रश्नः अज्ञानमूलः। जैनसंस्कृतप्राकृतसाहित्ये किं नास्ति? इति आधिकारिकतया प्रतिप्रश्नं कर्तुं विदुषां सामर्थ्यं न भवति अतएव जैनसंस्कृतप्राकृतसाहित्यस्य एतादृशी स्थितिः वर्तते ।

प्राचीनजैनसंस्कृतप्राकृतसाहित्ये धर्मनगर्याः अयोध्यायाः उल्लेखः असकृदभूत् । जैनकविः विमलसूरयः प्राकृतभाषायां पउमचरियं इति ग्रन्थं विरच्य रामायणस्य गुप्तरहस्यस्योद्घाटनं कृत्वा भगवतः रामस्य वीतराग्युदात्तचरित्रस्य अयोध्यायाश्च वर्णनं कुर्वन्ति तु तत्रैव आचार्ययतिवृषभाः तिलोयपण्णतिग्रन्थे अयोध्यां नैकेषां नाम्नां सम्बोधयन्ति । जैनसाहित्ये रामकथायाः सम्बन्धिताः नैके ग्रन्थाःनिगदिताः, यथा रविषेणकृतः 'पद्मपुराणम्' (संस्कृते), स्वयम्भूकृतः 'पउमचरिउ' इति (अपभ्रंशे) ,संस्कृते गुणभद्रकृतम् उत्तरपुराणञ्च। जैनपरम्परानुसार भगवतो रामस्य मूलनाम 'पद्मः' अपि आसीत्। अत्र ज्ञातव्यमस्ति यच्छास्त्रेषु अयोध्यामयुध्या, विनीता- नगरी, साकेतः, सुकौशलः, रामपुरी, विशाखा चादिनामेभ्यः उक्तवन्तः आचार्याः । जैनपरम्परायामिदमेकं शाश्वतं तीर्थं विद्यते।

जैनपरम्परानुसारं वर्तमानकालिकानां चतुर्दशतीर्थङ्करानां पञ्चानामियं जन्मभूमिरस्ति, नहि केवलमियदेव, अपितु इयमनन्तानन्तानां तीर्थङ्कराणां जन्मभूमिः विद्यते, प्रत्येक-चतुर्थकाले च चतुर्दशतीर्थङ्कराः प्रभुनियमेनायोध्यायामेव जायन्ते । साम्प्रति हुंडावसर्पिणीकालदोषात् इयं केवलं प्रथमतीर्थङ्करादिनाथस्य, द्वितीयस्याजितनाथस्य, चतुर्थस्य-अभिनन्दननाथस्य, पञ्चमसुमतिनाथस्य चतुर्दश-अनन्तनाथस्य च पञ्चानामेव जन्मभूमिरस्ति ।

आचार्येण यतिवृषभेण (1AD) तिलोयपण्णतिग्रन्थे लिखितम् -

जादो हु अवज्झाए ,उसहो मरुदेवि-णाभिराएहिं ।
चेत्तासिय-णवमीए,णक्खत्ते उत्तरासाढे ।। (4/533)

अर्थात् ऋषभनाथः अयोध्यायां, मरुदेवीनाम्नीमातुः नाभिरायश्च पितुः चौत्रकृष्णनवम्यां तिथौ, उत्तराषाढायां नक्षेत्र अजायत् ।

माघस्स सुक्क पक्खे ,रोहिणि-रिक्खम्मि दसमि-दिवसम्मि ।
साकेदे अजिय-जिणो, जादो जियसत्तु-विजयाहिं ।।(4/534)

अर्थात् तीर्थङ्कर-अजितनाथजिनेन्द्रः साकेतनगर्यां जितशत्रुविजयाभ्यां मातृपितृभ्यां माघशुक्लदशम्यां रोहिणी नक्षत्रे उत्पन्नो बभूव ।

माघस्स बारसीए ,सिदम्मि पक्खे पुणव्वसू-रिक्खे ।
संवर-सिद्धत्थाहिं ,साकेदे णंदणो जादो ।।(4/536)

अर्थात् अभिनंदनस्वामी साकेतनगर्यां संवरसिद्धार्थाभ्यां मातृपितृभ्यां माघशुक्ला द्वादशम्यां पुनर्वसुनक्षत्रे उत्पन्नो बभूव ।

मेघप्पहेण सुमई साकेदपुरम्मि मंगलाए य ।
सावण -सुक्केयारसि-दिवसम्मि मघासु संजणिदो ।।(4/537)


अर्थात् तीर्थङ्कर-सुमतिनाथजिनेन्द्रः साकेतनगर्यां मेघसममंगलाभ्यां मातृपितृभ्यां श्रावणशुक्लाएकादशम्यां मघानक्षत्रे उत्पन्नो बभूव ।

जेट्ठस्स बारसीए ,किण्हाए रेवदीसु य अणंतो ।
साकेदपुरे जादो ,सव्वजसा-सिंहसेणेहिं ।।(4/546)

अर्थात् तीर्थङ्कर-अनन्तनाथजिनेन्द्रः अयोध्यापुर्यां सिंहसेनसर्वयशोभ्यां ज्येष्ठकृष्णद्वादश्यां रेवती नक्षत्रे च अवतीर्णः ।

आचार्यः संघदासगणिः (3AD) प्राकृतभाषायाँ विशाले गद्यात्मके कथाग्रन्थे 'वसुदेवहिंडी' इत्यस्मिन् उल्लिखितवान् -'इहं सुरासुरिंद -विंदवंदियम-चलणारविंदो उसभो नाम पढमो राया जगप्पियामहो आसी। तस्स पुत्तसयंद्यदुवे पहाणा-भरहो बाहुबली य। उसभसिरी पुत्तसयस्स पुरसयं जणवयसयं च दाऊण पव्वइओ। तत्थ भरहो भरहवासचूडामणी,तस्सेव नामेण इहं 'भरहवासं' ति पवुच्चति,सो विणीयाहिवती। बाहुबली हत्थिणाउर-तक्खसिलासामी।'

अर्थात् अत्र सुरासुरवन्दितः चरणारविन्दवत् जगन्पितामहः ऋषभनाम्नः आदिमः राजा बभूव । तस्य शतपुत्राः आसन्, येषु मुख्यौ द्वौ आस्ताम् - भरतः बाहुबली च । ऋषभेण तावत् शतपुत्राः शटनगराणि जनपदाश्च दत्त्वा प्रव्रजितः। तेषु सूनुषु भरतः भारतस्य चूड़ामणिरासीत् । तस्य नाम्नि एवं अयं देशः भारतवर्षः अभिहितः । सः विनीताधिपतिरासीत् बाहुबली च तक्षशिलायाः स्वाम्यासीत् ।



गणिनी-आर्यिकाज्ञानमतीमहोदया 'महातीर्थअयोध्या' नामके पुस्तके लिखितवती यत् अगणिताः महापुरुषाः इमामयोध्यां प्राञ्जलीकृतवन्तः । आदिपुराणस्य द्वादशे पर्वणि आचार्यः जिनसेनः अयोध्यानगर्याः अतीवं वैभवशाली वर्णनं विस्तरेण कृतवान्, तस्यै एका छाया अस्मिन् श्लोके दरीदृश्यते -



संचस्करुश्च तां वप्रप्राकारपरिखादिभिः।
अयोध्यां न परं नाम्ना गुणेनाप्यरिभिः सुराः।।(12/76)

देवाः तां नगरीं वप्रात्, प्राकारात् परिवायाश्च आदितः सुशोभितवन्तः । तस्याः नगर्याः नाम अयोध्या आसीत् । सा केवलं नाममात्रेण नासीत् अयोध्या अपितु गुणेभ्यः आसीदयोध्या। अरिभिः योद्धुं न शक्या अर्थात् कश्चन शत्रुः योद्धुं जेतुञ्च न शक्नोति तां सा नामायोध्या।

राजस्थानस्य अजमेरनगरमध्ये श्सोनी जी की नाशिया' इति विशालजैनमन्दिरमस्ति तस्मिन् मन्दिरे सिद्धकूटचौत्यालये अयोध्यानगर्याः स्वर्णरचना रचिताऽस्ति यां दर्शनाय पर्यटकाः देशविदेशेभ्यः आगच्छन्ति। मन्दिरेऽमुष्मिन् तीर्थङ्करऋषभदेवस्य प्रतिमां 1965 तमे वर्षे, ख्यातजैनविद्वान् पंडितसदासुखदासस्य निर्देशने रायबहादुरसेठमूलचंद-नेमिचंद-सोनी इति द्वौ विराजितवन्तौ आसीत् । तस्मात् कालादेव अत्र स्वर्णायोध्यायाः निर्माणं, आदिपुराणस्य वैभवशालिवर्णनानुसारम् आरम्भितम्। 1085 वर्षे कार्यमिदं पूर्णताङ्गतम् तथाऽस्य नाम स्वर्णम्, सोनी अथवा स्वर्णमन्दिरमभूत् ।

ये पञ्चतीर्थंकरा अयोध्यानगरे अजायन् तेषां स्मरणस्वरूपे अयोध्यातीर्थेव तेषां मूर्तयः पदचिन्हानि च स्थापितानि वर्तन्ते, दर्शनार्थिनः तेषां प्रतिदिनं पूजनमभ्यर्चना च कुर्वन्ति । साम्प्रति अयोध्यानगरे कटरास्थिते दिगम्बरजैनमन्दिरे द्वितीयः तीर्थंकर-अजितनाथः, चतुर्थाभिनन्दननाथः, पञ्चमः सुमतिनाथः, एतेषां त्रयाणां स्मारकम् अस्ति।

सरयूनद्यास्तटे चतुर्दशतीर्थंकरस्यापि अनन्तनाथस्य मन्दिरम् टोंक इति च अस्ति। अयोध्यायामेव बक्सरियाटोलायां मस्जिदतः पृष्ठतः तीर्थकरादिनाथस्य एक लघुमन्दिरमस्ति यत्र तस्यैव टोंक इति स्थापितोऽस्ति।


पंडितबलभद्रेण श्भारत के दिगम्बर जैनतीर्थ' पुस्तकस्यादिमे भागे अत्र स्थितानि जैनमन्दिराणि विस्तरेण वर्णितानि । इतिहासकारैर्मन्यते यत् 1194 वर्षे मुहम्मद गोरी इत्यस्य भ्रात्रा मखदूमशाहजूसगोरर्या अयोध्याऽऽक्रान्ता तदानीमत्र स्थितं विशालमेकं मन्दिरं खण्डयित्वा तेन मस्जिद इति निर्मितम् ।

अत्रैकः कथानकः प्रसिद्धः अस्ति यत् कालान्तरे जैनाः मुगलशासकनवाबफैजुद्दीन याचितवंतः, इदं मन्दिरमस्माकमासीत, तदा तेन प्रमाणानि आहूतानि-

अत्र च भूमिं कर्षयित्वा एक स्वस्तिकं, नारिकेलं चतुर्मुखीदीपकश्च प्राप्तः, तदा तेन शासकेन किञ्चिद् स्थानं प्रदत्तम्। जैनाः अनुमतिं नीत्वा समीपे एव एक लघुमन्दिरं निर्माय तत्र ऋषभदेवस्य चरणचिन्हं स्थापितवन्तः । अत्रत्य कटरामोहल्ला इत्यस्मिन् अपि एकः टोंक इति अस्ति । अत्रैव जातौ ऋषभदेवस्य पुत्रौ, भरतबाहुबल्यौ त्योः चरणचिन्हानि स्थापितानि।

1330 ईशवीं यावत् अयोध्यायामनेकानि मन्दिराणि अभूवन् । कटरामन्दिरे 1952 वर्षे तीर्थंकराणामादिनाथभरतबाहुबलीनां तिस्रः मूर्तयः विराजिताः सन्ति अथवा स्थापनं कारयित्वा सन्ति। 1965 तमे वर्षे रायगंजे रियासती-उद्यानस्य मध्ये एकं नवीनं मन्दिरं निर्मितं यस्मिन् 31 फुट (एकत्रिंशत् फुट)परिमाणात्मिका तीर्थंकरस्य ऋषभदेवस्प प्रतिमा रारजिते चकासते च । गणिनी ज्ञानमती मातुः प्रेरणातः 1994 तयं वर्षमिह महामस्तकाभिषेकोऽयोजितः त्रिचौबीसी-च मन्दिरं समवशरणमन्दिरश्च नवीनतया निर्मितम् ।





29 अगस्त 2003 तमे वर्षे 'टाइम्स ऑफ इण्डिया' इत्यस्मिन् समाचारपत्रे "ASI" इत्यस्यैका रिपोर्ट इति प्रकाशिता आसीत् ययाऽत्र खनने जैनमूर्तयः प्राप्ताः आसन् । प्रधानमन्त्रिनरेन्द्रमोदी महोदयानां मुख्यमंत्रियोगीमहोदयानां संयुक्तायासेन अद्य अयोध्या नगरी पुनर्जीविता भूता । तत्रत्या प्राचीना जैनसंस्कृतिरपि पुनः स्वगौरखं प्राप्स्यतीत्याशास्महे -

धण्णो णव अयोज्झा उसह-भरह-बाहुबली-अजिय-सुमइ ।
पवित्तो खलु जम्मभूमि अहिणंदण-अणंत-रामो य ।।

अर्थात् नवीनेयमयोध्या धन्याऽस्ति या प्रथम-द्वितीय-चतुर्थ-पञ्चम-चतुर्दशतीर्थंकराणां भगवतश्च रामस्य प्राञ्जल- जन्मभूमिरास्ति।



## दिव्यं भवेन्मन्दिरम्



डॉ.अम्बरीशकुमारमिश्रः
असिस्टेन्ट प्रोफेसर
भरतमिश्रसंस्कृतमहाविद्यालयः
छपरा, बिहारः

कौशल्यासुतराजपुत्रभरतप्राणातिभक्तप्रियाः
सीताजानिमहेशगेयहनुमद् ध्येयप्रभालक्ष्मणाः ।
सुग्रीवादिकपीन्द्ररक्षणपराः साकेतधामेश्वराः
तेषां दुर्दिननिर्गतं प्रियसखे ! दिव्यं भवेन्मन्दिरम् ।।१।।

विश्वामित्रसुयज्ञरक्षणपराः मारीचबाह्वोस्तथा
हन्तारः स्वगुरोर्विश्रुत्य वचनं नत्वा गुरुं सादरम् ।
वैदेहीमुखपङ्कजेऽतिसुषमे मुग्धाः धनुर्भञ्जकाः
तेषां दुर्दिननिर्गतं प्रियसखे ! दिव्यं भवेन्मन्दिरम् ।।२।।

राज्ये नैव पितुः सुखं न च शुचा मातुर्वने निस्पृहाः
भूभारं ह्यपनाय गोश्रुतिसुभूदेवान् सदा रक्षकाः ।
भारद्वाजमुनिसुहृद्गुहपतिभील्लान् जनान् तारकाः
तेषां दुर्दिननिर्गतं प्रियसखे ! दिव्यं भवेन्मन्दिरम् ।।३।।

वर्षं कष्टमयं चतुर्दशमहो आरण्यकं यापिताः
वाल्मिक्यादिसुपूजिताम्बुजपदाः साकेतवासिप्रियाः ।
सीतायाः हरणाद्विशोकनिहतास्त्वन्वेषणे तत्पराः
तेषां दुर्दिननिर्गतं प्रियसखे ! दिव्यं भवेन्मन्दिरम् ।।४।।

रक्षोदूषणताडकादिनिहताः आर्षक्रतोः रक्षकाः
सौमित्रेयसुपूजितांघ्रिरजसाऽहल्या पवित्रीकृताः ।
शूलीचापनिभञ्जनेऽतिचतुराः ये जानकीवल्लभाः
तेषां दुर्दिननिर्गतं प्रियसखे ! दिव्यं भवेन्मन्दिरम् ।।५।।

पाषाणाः जलधिप्रबन्धनकराः नाम्नाद्भुताः सन्तराः
देवेन्द्रं विजितस्तथा च निहतो यत्प्रेरितो लक्ष्मणः ।
येषां भ्रूः कुटिलैव रावणहताः गायन्ति काव्यप्रियाः
तेषां दुर्दिननिर्गतं प्रियसखे ! दिव्यं भवेन्मन्दिरम् ।।६।।

पौलस्त्यं दशवक्त्रकादिहननं कृत्वाऽमरान् रक्षकाः
आशीर्वादमवाप्य वाततनयः येषां हि दैत्यान्हतः ।
नीलादिप्रभृतिप्रश्रेष्ठकपिभिः सम्पूजिताः राघवाः
तेषां दुर्दिननिर्गतं प्रियसखे ! दिव्यं भवेन्मन्दिरम् ।।७।।

अद्यापि प्रददाति यत्सुचरितं सर्वोत्तमं जीवनं
गार्हस्थ्ये कथमत्र भ्रातृदयितं वासस्तथा भोजनम् ।
पुत्राणां पितरौ प्रति प्रतिदिनं व्यापारसंघोचितं
तेषां दुर्दिननिर्गतं प्रियसखे ! दिव्यं भवेन्मन्दिरम् ।।८।।

## स्वामिस्वागतगानम्

(तर्जः-त्वदीयं स्वागतं कुर्मः)



- ईशानतिवारी
व्याकरणविभागः
काशीहिन्दूविश्वविद्यालयः

प्रतीक्षा पूर्णतां याति
स्वायोध्या भूतले भाति ।
तवास्ति स्वागतं तत्र
प्रभो श्रीरामनारायण! ।।
मृदङ्गादि यथाशक्ति
करोति किर्तनं रम्यम् ।
पठित्वा स्वस्तिमन्त्रं ते
करोमि स्वागतं देव! ।।
न द्वेषो नैव मे स्वार्थो
न वा किञ्चिद्दुर्भावः ।
अहं ते भद्र! भक्तिवान्
करोमि स्वागतं स्वामिन्! ।।
हे देव! हे नराधीश!
श्रीसाकेते तटस्थे मे ।
इदानीं स्वालये भव्ये
तवास्ति स्वागतं राजन्! ।।
दयामय दैत्यनाशार्थं
युगेऽस्मिन् दर्शनं देयम् ।
अहं ते स्वागतं कर्तुं
सदैव तत्परो वर्ते ।।
धनं नास्त्याधिकं पार्श्वे
न चास्ति साधनाशक्तिः ।
अहं दीनो महादुष्टः
परन्तु बालकस्त एव ।।
कपीशेश शशीशेश
तवेशानेश दीनेश ।
स्वजन्मस्थान एवेश !
पुनश्चास्त्याभिनन्दनम्।।




# स्वागतं रामचन्द्रस्याऽयोध्याभिनवमन्दिरे



-प्रो. धर्मदत्तचतुर्वेदी
संस्कृतविभागाध्यक्षः सङ्कायाध्यक्षश्च
के.उ.ति.शि.संस्थानम्, सारनाथः, वाराणसी।

धन्योऽसौ भारतदेशो यस्य वस्तूनि कदाचिद् ह्रियन्ते कैश्चिदपि दुर्दान्तदानवैस्तदाऽन्यस्मिन् काले भवन्ति केचित्प्रबलपुण्यात्मानो येषां परमपुरुषार्थबलेन तानि लभ्यन्तेऽपि पुनः। कीदृशं दौर्भाग्यमेव भगवन्मन्दिरमपि न परित्यजन्ति धर्मान्धाः परसंस्कृतिविदूषका निजधर्मदुराग्रहाः। साम्प्रतं हिन्दुभिर्निजहृदयललामभगवच्छ्रीराममन्दिरभुवं लब्ध्वा २२ जनवरी २०२४तमे दिनाङ्के तत्रैव नवनिर्मितभव्यमन्दिरं सृष्ट्वा श्रीरामविग्रहो रघुवंशबान्धवैः सह संस्थाप्यते। वृत्तेनैतेन सर्वापि भारतप्रजा तुष्यन्ती प्रफुल्लनीलपङ्कजवदना प्राणप्रतिष्ठामन्त्रोच्चारणेनापूर्वोत्साहेनायोध्यायां दरीदृश्यते। भारतीयप्रजाधनेन वर्तमानमोदिशासनप्रयत्नेन च नैककोटिमितप्रजा श्रीराममन्दिरं प्रतीक्षमाणा सती हर्षायतेतराम् । नूनमेव प्रधानमन्त्रिनरेन्द्रदामोदरदासमोदिनां कार्यकाले अशेषविघ्ना ध्वस्तीकृताः पूर्वमुख्यमन्त्रिकल्याणसिंहकार्यकाले बाबरीमस्जिदाकृतिरूपेण संस्थिता क्वचिद् मन्दिरभूमिः स्वयमेव निजहस्ते गृहीता। तात्कालिकमुख्यमन्त्रिणानेन निजपदमपि त्यक्तं श्रीरामभूमिप्राप्तये। न विस्मार्यो नेताऽसौ कदापि भारतीयश्रीरामभक्तैर्भारतेतिहासे सुवर्णाक्षरैरङ्कितो दिवङ्गतोऽसौ जयतुतरां कल्याणसिंहः। मोदिमहोदयानां कार्यकाले न्यायालयान्मन्दिरभूमिर्नैकसाक्ष्यप्रस्तुत्याऽलभ्यत । जयश्रीरामेति घोषेण चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिरिति धिया रामभक्तानां सौभाग्यजागरणकालोऽसौ। सनातनधर्मस्य महाविजयावसरोऽयं यत्र आबालवृद्धतरुणतरुणीयुवकयुवतीनां मुखेन कोणे कोणे जय श्रीरामेति ध्वनिः श्रूयते नितराम्। धन्या रामचरितगायिका वाल्मीकिसंस्कृतवाणी रामायणप्रणेत्री गुञ्जतितरां सर्वतः। संस्कृतदेवभाषाया अपि विजयोऽयं यत्र प्रत्यक्षरं प्रत्येकं छन्दोऽद्य प्रसीदति श्रीरामराज्याधिकारं प्राप्य। को हि संस्कृतज्ञोऽथवा को हि कस्याश्चिदपि भारतीयभाषाया वेत्ता प्रयोक्ता वा यो नाद्य प्रसीदति। संस्कृतदेवभाषापि रामचरितमुपवर्णयन्ती पुनरपि मन्दिरस्थापनया प्रसीदत्येव । यत्र एकैकमपि गीतं पद्यं छन्दो वा पुनर्गास्यते, पुनर्घोषयिष्यते।

संस्कृतज्ञा विद्वांसोऽस्मिन्नवसरे रामचरितवर्णनासक्ताः सर्वतः पत्रपत्रिकां रामकाव्यानि वा प्रकाशयन्तो मोमुद्यन्ते । संस्कृतेनैवादौ रामचरितं निरूप्य ततोऽन्यभाषाभ्यः श्रीरामचरितामृतप्रसादो व्यतीर्यत। महाकविकालिदासेनापि रघुवंशमहाकाव्येन भवभूतिनोत्तररामचरितनाटकेन विविधान्यसाहित्येन रामरक्षास्तोत्रेण वा श्रीरामचरितं संरक्षितं सेवितं प्रसारितञ्च । सुरभारतीवाङ्मयेनैव वेदस्मृतिधर्मशास्त्रपुराणषड्दर्शनकाव्यव्याकरणशिल्पज्योतिषायुर्वेदादिशास्त्रप्रदानेन भारतीयसंस्कृतिवैभवं संरक्षितं भारतीयप्रकृतिभूमण्डलमानचित्रं प्रकाशितमिति तथ्यं न विस्मरणीयमद्यतनेन केनापि भारतीयमानवेन। तस्माद्देववाणीसंस्कृताध्ययनेन तद्विमर्शेन प्रचारेणैव भारतीयैकता, भारतपरिचयश्च । तत्त्वमसि, अहं ब्रह्मास्मि, नेह नानास्ति किञ्चन, यत्र विश्वं भवत्येकनीडम्, सा संस्कृतिः प्रथमा विश्ववारा, माता भूमिः पुत्रोऽहं पृथिव्याः, वसुधैव कुटुम्बकमित्यादिवचनैः संस्कृतमेव भारतात्मभूतं, सर्वजनस्पृहणीयं सर्वात्मीयताजागरणाविभावमाध्यात्मिकवैभवेन सुखशान्तिप्रतिष्ठापकम्, एकस्यैव परब्रह्मणो विवर्तरूपमिदं जगत् ततो व्यावहारिकं, ब्रह्मशक्त्यनुप्राणितं वेद्यम्। नारायणप्रजापतिशिववचनमन्त्रसंरक्षकं विश्वैकतासाधकं सर्वजनहितकारकं, कारुण्यामृतसुखवर्षकं, सत्यसदाचारत्यागशीलक्षमौदार्यस्थापकं संस्कृतमेव श्रीरामभक्तिगीतगायकं भारतीयप्रभुताप्रदायकं मन्तव्यम्। तादृशं संस्कृतमेव केन नाभिनन्दनीयं, न वरणीयं, न शिक्षणीयमिति भारतीयसंविधाने प्रयत्नेन श्रीराममन्दिरं कारागृहादुन्मुक्तं मन्यतेऽद्य चेत्तदा श्रीरामायणदेवभाषापि मन्ये कारागृहादुन्मुक्तेव। तस्मान्मोदिप्रशासनेनेयं भाषा जातिवर्गक्षेत्रवादादतिदूरे सती हृदयेनालिङ्ग्यतां पाठ्यतां विमृश्यतां जनजने। तदैव भारते विविधभाषाजातिवर्गवादाः समाप्तिं यास्यन्ति। संस्कृते सा शक्तिरद्य या पशुहिंसां मद्यदुर्व्यसनं तृष्णां राष्ट्रद्रोहं च समापयितुमर्हति।

शिवराजविजये संस्कृतोपन्यासेऽम्बिकादत्तव्यासप्रणीते महात्मन् क्वाधुना विक्रमराज्यम्, क्व मठे मठे वेदघोषः, क्व घण्टानादो मन्दिरेषु, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते इत्यादिवाक्योपन्यासैर्भारतवर्षस्य दुर्दशा प्रादर्शि। कस्य सहृदयस्य चेतो न दूयते विज्ञायेदम्। कदाचिदद्य मयोच्येत-अहो अयोध्यायां प्रतिष्ठते पुनर्मन्दिरे लब्धे भगवान् रामचन्द्रः सर्वत्र मठे मठे श्रीरामध्वनिः जय श्रीरामेति निनादः, गच्छतु राममन्दिरं द्रष्टुं, राममयोऽद्य भारतदेशः, यत्र यत्र श्रीरामकीर्तनं तत्र तत्र रघुनाथवन्दनं, जयति सनातनधर्मः, रामराज्य, तव भूरि स्वागतम् अभिनन्दनवन्दनमाङ्गल्यम्। रामराज्यवर्णनभाषेयं कारागेहादुन्मुक्ता। जय जय रामायणगुणं गाय संस्कृतवैभवरूपविकासम्, श्रीरामन्दिरे संस्कृतमपि विद्योतते यत्र यत्र रामः तत्र तत्र संस्कृतम् इति धिया भव्यमन्दिरे रामायणसंस्कृतमपि तत्र भित्तिषु विविधरूपेणोल्लिख्यते, अयोध्याश्रीराममन्दिरप्रतिष्ठापनयानया संस्कृतमपि प्रतिष्ठते। संस्कृतं सम्पूर्णभारतेन हृदयेन समर्च्यते । संस्कृतनाम्ना कस्यापि न वैमत्यं न चास्वीकृतिः। नूनमेव वर्तमानशासनं रामायणसंस्कृतभाषामभिनन्दति, समभ्यनन्दत्, समभिनन्दिष्यति नितराम्। वर्तमानसमाजेन संस्कृतं श्रीरामश्चेति पर्यायत्वेनाभ्युपगन्तव्यम्।

संस्कृतेनाद्य रामः समाराध्यते, राघवं सत्कुलं गीयते नम्यते ।
यत्र रामश्चलेद् देववाणी चलेद् रामचन्द्रस्तुतिः संस्कृते गीयताम् ।। १ ।।

अयोध्यां गच्छन्तो रघुवरकुलोत्साहमहितां
महीयांसो भक्ता निजपरिजना भान्ति गुणिनः ।
प्रतिष्ठा रामस्य प्रचितदुरितौघप्रशमनी
चिराद् भाग्याल्लब्धा विपुलशुभपुण्या सुखकरी ।। २ ।।
विश्वप्रपञ्चशमनं प्रभुतैकसिन्धुं
संसारचेतनमचेतनमेव नित्यम् ।
ओङ्कारमक्षरविभुं परमात्मतत्त्व-
मिक्ष्वाकुवंशतिलकं प्रणमामि रामम् ।। ३ ।।

# रामस्यायनम्



डॉ रश्मि प्रदीप
वाराणसी

वर्तमानकालीनयुवानःतार्किकाःसन्ति। ते कमपि विचारं परम्परामिति मत्वा नाङ्गीकुर्वन्ति। अस्यां परिस्थितौ प्रश्नोऽयं समुदेति यत् रामं परम्परां मत्वा केवलमंगी कथं कुर्याम् इति। रामे किमिति येन तेषां यूनः जीवनं दिशां दद्यात्।रामस्य जीवने किशोरावस्थादेव प्रतिकूलपरिस्थितयः आगताः आसन्। कल्पनामपि कःकर्तुं शक्नोति यद् राज्ञः ज्येष्ठः पुत्रः राजप्राप्तिस्थाने वनवासस्य दारुणपीणामुत्थापयिष्यति। तस्य पत्न्याः अपहरणं। रामः सर्वाः बाधाः सहर्षमंगीकृतवान्।कथनस्यायमभिप्रायः कस्यापि मानवस्य जीवने विपरीतपरिस्थितीनामागमनं भवितुमर्हति अस्मिन्नवसरे सःस्वयमात्मानं कथं नियोजयति, स्थापयति वा इति विचारणीयं भवति। वस्तुतः चरित्रोन्नयनप्रक्रियया एव ते मर्यादापुरुषोत्तमरूपेण 'रामो विग्रहवान् धर्मः' रूपेण जाताः। माता कैकेयीद्वारा वनगमनप्रस्तावःकदाचित् रामस्य व्यक्तित्वविकासाय, राजप्राप्तिविशिष्टगुणप्राप्तये एव आसीत्। रामः सहर्षं प्रस्तावं स्वीकृत्य वनं याति। रामेण सह सीता अपि वनं गन्तुमिच्छति परन्त्वयं विचारःप्रस्तावो वा सीतायाः एव वर्तते तत्र श्रीरामः न निर्दिशति। लक्ष्मणवनगमनमपि सुमित्रायाः लक्ष्मणस्य च स्वतन्त्रविचारः अस्मिन्नपि प्रसंगे रामः किचिंदपि न निर्दिशति। केवटादारभ्य विभीषणपर्यन्तं समेऽपि सुग्रीवादारभ्य समुद्रपर्यन्तं सर्वे स्वविवेकानुसारं निर्णयं गृहणन्तु। रामो जानाति यत् यः स्वविवेकानुसारं निर्णयं गृहणाति सः दोषारोपणं कृत्वा दायित्वबोधेन मुक्तः न जायते। वस्तुतः रामः सर्वेषां जीवने वर्तते। व्यक्ति स्वजीवने समागतपरिस्थितीनां समायोजने प्रबन्धने च कुशलः चेत् स राम एवास्ति। यदि राममवतारमात्रं मत्वा विशिष्टयुपाधिप्रदानद्वारा दायित्वबोधमुक्ताः भवितुं शक्नुयाम्। परन्तु राम अयनाश्रयेण स्वयमपि रामदिशाग्रसरो भवितुमर्हामः।

इत्येवश्रीरामस्यायनमिति।

# विश्ववन्द्यो मर्यादापुरुषोत्तमः श्रीरामः!!



-डॉ. अरविन्दकुमारतिवारी
संस्कृतप्रवक्ता
आदर्शवैदिकविद्यालयइण्टरकालिजं,
नंगला-सिनौली, बागपतम्, उत्तरप्रदेशः २५०६११

श्रीरामस्य स्वतन्त्रभारते एकमद्भुतम् अलौकिकं कार्यं क्रियमाणमस्ति, यस्य चर्चा सर्वेषां मुख्यो विषयो वर्तते। स विषयः श्रीराममन्दिरप्रवेशः। सत्यमेव यस्मिन् देशे श्रीरामो विलसति, यस्य देशस्य प्रतिकणं रामम् उच्चारयति, तस्यैव देशस्य रामो हन्त! हा हन्त! --- अपसारितः कलंकः साम्प्रतमनेन महानायकेन भारतशासकेनेति दर्शं दर्शं मोमुदीति मन्मनः। श्रीरामो मानवकल्याणकारकः पुरातनोऽपि नवीनः, नवीनोऽपि पुरातनः, पुरातनोऽपि सनातनो वर्तते। भगवान् श्रीराम एव लक्ष्मणो भरतो मातरश्च किं किं वदेयं सर्वमपि पात्रं दर्शनीयमस्ति। वनगमानकाले माता सुमित्रा लक्ष्मणं ब्रवीति-

रामं दशरथं विद्धि मां विद्धि जनकात्मजाम्।
अयोध्यामटवीं विद्धि तात! गच्छ यथासुखम्।।

अस्मिन् श्लोके महान् उपदेशो विलोक्यताम्-

अयि! लक्ष्मण! त्वया रामः दशरथवन्मन्तव्यः अर्थात् पितृसमानो द्रष्टव्यः। इयं जनकनन्दिनी जानकी सुमित्रासमाना पूजनीया। अटवी अयोध्येव रक्षणीयेति।

निखिले ब्रह्माण्डे न कश्चन एतादृशश्चरित्रवान् बलवान् मतिमान् अर्थात् सर्वगुणसम्पन्नः कश्चिन्नायको लक्ष्यते यस्मिन् इमे सर्वे गुणाः सहोदरभ्रातर इव स्युः। परन्तु भारतीयसंस्कृतेः महान् संवाददाता भगवान् नारदो विजानाति यद् एकस्तु सर्वगुणसम्पन्नो नायको वर्तते यस्य नाम अस्ति श्रीरामः। महर्षिर्वाल्मीकिरपि तमेव पृच्छति यो वक्तुं शक्नुयात्। वस्तुतः अयमेव भावः महाकविना कालिदासेनापि रघुवंशादौ वर्णितो वर्तते। अपरे सुकवयः अपि भगवन्तं श्रीरामं वर्णयित्वा आत्मानं धन्यं मन्यन्त इति जनश्रुतिरस्ति। अस्माभिः किमपि कार्यं श्रीरामस्मरणपूर्वकमेव कर्तव्यमिति निर्दिशति गोस्वामी तुलसीदासो लंकिनीव्याजेन। यथा

प्रबिसि नगर कीजै सब काजा हृदय राखि कोसलपुर राजा।

अतः उच्यते रामो विश्वासो वर्तते रामः श्वासो वर्तते रामः उच्छ्वासो वर्तते रामो विकासो वर्तत इति।

अधुना प्रकृतमनुसरामः।

भगवान् श्रीरामो लोके मर्यादां स्थापयितुं गोद्विजधर्मादिरक्षणार्थमेव अवततार इति निगदन्ति शास्त्राणि। सत्यमेवैतत् भारतस्य नायकः श्रीरामचन्द्रः रविकुलमणिरस्ति। अस्मिन् भगवति आसीत् किमपि विशिष्टमेव दर्शनीयमवर्णनीयं तत्त्वमिति विभावयिष्यामो वयम्। सम्प्रति श्रीवाल्मीकेः रामः कीदृश इति परामृशामः।

विज्ञायत एवैतत् सर्वमपि विज्ञैर्यत् श्रीरामः आदर्शपुत्रः, आदर्शो भ्राता, आदर्शो भर्ता, आदर्शो नृपः, आदर्शः सखा, आदर्शः प्रजानुरंजकः इत्यासीत्। इदमेव कारणमस्ति यतो देशे देशान्तरे चास्य नामकीर्तनं सानन्दं विधीयते। साम्प्रतं समाजः सर्वत्र नैतिकतायाः ह्रासं पश्यन् विषीदन्नस्ति। प्रजापालनवृत्तिस्तु दूरं गता क्वचित् शुष्कककासारे मृतशैवालोपमा दृश्यते। परिवारे ग्रामे नगरे राजधान्यां चानेकाः घटनाः घटमानाः सन्ति यासामुन्मूलनोपायाः न दृष्टिपथमारोहन्ति। अस्यां परिस्थितौ श्रीराम एव शरणमेकमात्रमिति निगदन्ति पारदृश्वानः सन्तः।

आदर्शः पुत्रः-- भगवान् श्रीरामः एकैनैव शरेण सर्वमपि लक्ष्यं भिन्नत्ति। मातुः कैकय्याः वरदानेन आत्मनो जीवनं सार्थकं मन्यते। पितुराज्ञामवाप्य क्षणमात्रमपि न पुर्या तस्थौ। गुरवो मातरो बन्धवः सचिवादयश्चान्ये बहुधा ज्ञानविज्ञानदृष्टान्तैः नीतवचनैश्च तमवरोद्धुं प्रायतन्त, हन्त! पितृवचनपालनदक्षः श्रीरामो नैव विरराममेति को न जानाति। अस्मिन् कराले कलिकाले विपरीतमतयस्तनयाः रामसमानाः भवेयुरिति कामयमान एव समाजः स्वपुत्रस्य नाम रामेति करोति। भगवान् रामः अस्माकं सामाजिकानां चेतसि बाल्यकालादेव समुपविष्टो दृश्यते। ग्रामेषु वृद्धाः प्रौढा बालका अपि प्रातः राम राम तात इति निगदन्तो लभ्यन्ते। सम्भवः इयं भावना आदिकालत एव प्रवर्तमाना अस्ति। अत एव गोस्वामिना तुलसीदासेन घोषितम्-

कलियुग केवल नाम अधारा। सुमिरि सुमिरि नर उतरहु पारा।

भगवतः श्रीरामस्य पितृवचनपालनवृत्तिरेव तं जगत्पूज्यं चकारेति साभिनन्दनं वक्तुं शक्नोमि।

आदर्शो भ्राता- चतुर्ष्वपि भ्रातृषु श्रीरामो ज्येष्ठ इति सर्वे विजानन्ति। लोकलीलालीनो मर्यादापुरुषोत्तमः चित्रकूटमायान्तं भरतं ससैन्यं ज्ञात्वापि न विपरीतचिन्तनं करोति। लक्ष्मणेन प्रेरितः सन्नपि मन्दं मन्दं स्मयमानः सर्वमपि आकर्णयति। आगतं भरतं परिष्वज्य अश्रूणि प्रमार्जयति। तेन बहुधा प्रार्थितः अपि नीतिवचनैः तं चित्रकूटात् अयोध्यां परावर्तयति। बन्धुना याचितां चरणपादुकामपि तस्मै प्रदाय राज्यं मम भरत! त्वयि न्याससरूपमस्तीति सान्त्वयित्वा पितृवचनं पालनं करोति। लंकायां महति संगरे मेघनादशक्तिपतितम् अचेतनं लक्ष्मणं दर्शं दर्शं विलपति।

आदर्शो भर्ता- स्वर्णमृगं लब्धुं निर्गतः श्रीरामो मारीचं निहत्य निवृत्तः आश्रमे सीतामनवाप्य विपिने भ्रामं भ्रामं विलपति। वृक्षान् पृच्छति, विगतचेतन इव सीतामन्वेषमाणो दूयते। स्वजानकीमेव लब्धुं वानरसैन्यसहायो मर्यादापुरुषोत्तमः असम्भवमपि सम्भवं विधाय रत्नाकरे सेतुं निर्माय लंकेशं विजेतुमयुध्यत। अनेन सम्पूर्णः संसारो बोधितो यत् अधर्मी कियानपि बलवान् स्यात् किन्तु धर्ममार्गगामिनं अल्पसहायं जेतुं न शक्नोति। अभिमानी परदारप्रियः अगणितसैन्यसज्जः अपि पराभवमेव लभते। अनेन रामरावणयुद्धेन अयमेव सन्देशः प्रसारितो यत् भगवान् श्रीरामः आदर्शो भर्ता वर्तते।

आदर्शः सखा- श्रीरामः संसारस्य आदर्शः सखा वर्तते। श्रीमद्वाल्मीकिरामायणस्य सर्वेष्वपि पात्रेषु मनोहरो मनोरमः गुणी रूपवान् भगवान् श्रीरामः येन साकमपि मैत्रीं करोति तं न विस्मरति। सुग्रीवेण सह मैत्रीं विधाय तस्य दुष्टभ्रातरं वालिनं निहत्य तत्रत्याः प्रजाः सुस्थाः कृत्वा सुग्रीवं राजपदे अभिषिच्य अग्रे प्राचलत्। इयमेव परिस्थितिः विभीषणेन साकमप्यासीत्। स्वदुष्टभ्रात्रा राज्यान्निष्कासितो विभीषणो यदा भगवन्तं श्रीरामम् आत्मनः शरणमन्यत तदा भगवता स स्वीकृतो दुत्कृत इति। अनयोः मैत्री सुखावहा अभूत्।

तुम्हरो मन्त्र विभीषण माना लंकेश्वर भये सब जग जाना।

आदर्शो नृपः- मर्यादा पुरुषोत्तमो भारतस्य अभूतपूर्वो नायको नृपो वर्तते। न भूतो न भविष्यतीति सूक्तिं चरितार्थयन् भगवान् श्रीरामः स्वरामराज्ये सर्वाः अपि प्रजाः सुरक्षिताः। तत्र न कश्चन केनापि प्रपीडितः। न कश्चित् बुभुक्षया पिपासया लुण्टाकैः चौरैः वंचकैर्वा दूनो दुष्टः इति श्रूयते।

न्यायप्रियः श्रीरामः प्रजापालको राजेति विश्रुतिं गतो वर्तते। अस्य भगवतश्चरितमेव लोककल्याणकरं मन्यते। अतएव तु ग्रामेष्वपि वैवाहिकमंगलगीते रामसीतयोरेव नामस्मरणं मंगलात्मकमुच्यते। अयं श्रीरामः आजीवनं सर्वैरपि गीयते, अस्य कारणमिदमेवास्ति यत् सर्वगुणमयो भगवान् धराभूषणमस्ति। गायन्ति भोजपुरीगायकाः अपि यत्-

राम ना बिगड़िहें जेकर केहु ना बिगाड़ी जी।

अतएव मम्मटादयो वदन्ति-

रामादिवद् वर्तितव्यं न रावणादिवत्।

अहमतीव आनन्दितो वर्ते श्रीराममन्दिरं विलोक्य रामोत्सवं मन्यमानः। अतो निवेदयामि-

गायन्तु मंगलगानमचिरं लोकमंगलकारकम्।
सुभगा रमा मधुरा मिलित्वा रामभक्तिविभावकम्।
लाजान् भगवत्यो हृदा देव्यो मनोज्ञाः सादरं
विकिरन्तु मुदिताः राममन्दिरदर्शकेषु निरन्तरम्।।

जय श्रीरामः इत्युच्चार्य लेखनीमन्यत्र नियोजयामि।

# वाल्मीकीयरामायणे निरूपितं श्रीरामस्य चरितम्



-डॉ. धनञ्जयवासुदेवद्विवेदी
अध्यक्षः संस्कृतविभागस्य
डा.श्यामाप्रसादमुखर्जीविश्वविद्यालस्य राँचीस्थस्य।

महर्षिवाल्मीकिना स्ववाल्मीकीयरामायणे श्रीरामस्य अत्युत्कृष्टं चरितं चित्रितम्। श्रीरामः सद्गुणानां प्रतिमूर्तिः वर्तते। रामायणस्य बालकाण्डे एव श्रीरामचन्द्रस्य चरितं सङ्केतितमस्ति। तत्र उक्तमस्ति यत् श्रीरामः इक्ष्वाकुवंशप्रभवः निगृहीतान्तःकरणः विपुलशक्तियुक्तः कान्तिमान् धैर्यशाली जितेन्द्रियः धीयुक्तः राजनीतिज्ञः प्रशस्तवाक् ऐश्वर्यसम्पन्नः रिपुविनाशकः, उन्नतस्कन्धः दीर्घभुजः कम्बुग्रीवः महाहनुः चास्ति। सः महोरस्कः, महेष्वासः, अप्रकटितास्थिसन्धिः, शत्रुनिषूदकः, आजानुबाहुः, शोभनशिरस्कः शोभनमस्तकः सम्यक्पराक्रमशाली च वर्तते। सः पराक्रमशीलः शोभासम्पन्नः सुलक्षणलक्षितः चास्ति। सः धर्मवेत्ता सत्यप्रतिज्ञः लोककल्याणकर्मरतः प्रशस्तकीर्तियुक्तः ज्ञानवान् पवित्रः संयमी समाधियुक्तः च वर्तते। सः ब्रह्मासदृशः सुन्दरः पोषकः शत्रुहन्ता प्राणिजनस्य पालकः धर्मस्य संरक्षकः अस्ति। सः आत्मनः क्षात्रस्य राजशासनरूपधर्मस्य तथा स्वीयस्य परिजनादेः भक्तादेर्वा पालकः वेदवेदाङ्गमर्मज्ञः युद्धशास्त्रे निष्णातः अस्ति। सः धर्मशास्त्रनीतिशास्त्रादिसमस्तशास्त्राणामर्थसारज्ञः विलक्षणस्मरणशक्तियुक्तः प्रतिभासम्पन्नः सर्वेषां लोकानां प्रेमपात्रं सज्जनः अकातरस्वभावः विद्वान् च अस्ति। सः सागरः नदीभिः इव नित्यं सज्जनैः आभिमुख्येन प्राप्तः श्रेष्ठः सर्वेषु जनेषु समानरूपेण व्यवहर्ता सदैव मधुराकृतिः च वर्तते। सः सकलगुणसम्पन्नः कौशल्यायाः हर्षातिरेककरः गम्भीरतायां सागरः इव धीरतया हिमाचल इव वर्तते। सः ओजस्वितायां नारायणेन तुल्यः चन्द्रतुल्यः क्षान्त्या धरित्रीसदृशः दानकर्मणि कुबेरेण समः सत्ये अपरः धर्म इव अस्ति।

रामः सत्यपराक्रमः। सः सत्यस्य महत्त्वं प्रतिपादयन कथयति-संसारे सत्यमेव ईश्वरः। इदमेव धर्मस्यापि सार्वकालिक आधारः। एतद्धि सर्वेषां मूलम् सत्यात्परं किमपि अभिषणीयं वस्तु नास्ति। इदमेव हि दानस्य यज्ञानुष्ठानस्य यज्ञाग्नौ प्रदत्तहवनस्य सर्वविधतपसां वेदानां चापि प्रतिष्ठानमास्ते। तस्मात् मनुष्यः सर्वदा सत्यपरो भवेत्। जगति भूमिः कीर्तियशो लक्ष्मीः सर्वदा सत्यवादिनं पुरुषमभिलषन्ति। श्रेयस्कामः सत्यमेव सेवते। लोभात् मोहात् अज्ञानाद्वा सत्यं न त्याज्यम्।

रामः धर्मोपरायणः। सः धर्मावतारो मन्यते। कथितञ्च-

**धर्मकामार्थतत्त्वज्ञः स्मृतिवान् प्रतिभानवान्।**
**लौकिके समयाचारे कृतकल्पो विशारदः।।**

दीनानुकम्पी धर्मज्ञो नित्यं प्रग्रहवान् शुचिः।

रामः स्वधर्मस्य परिपालनार्थं सर्वविधक्लेशं सहर्षं सहन्ते। रामस्तु

**रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता।**
**रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता।।**

रामः महान् प्रतिज्ञापरिपालकः। मर्यादापुरुषोत्तमो रामः स्वपितुः आज्ञापरिपालनार्थं सन्ततं सहर्षं समुद्यतो दृश्यते। पूर्वं दत्तवरा कैकेयी पतिं दशरथं वरद्वयम् अयाचत्-रामस्य चतुर्दशवर्षपर्यन्तं वनवासं स्वपुत्रस्य भरतस्य च राज्याभिषेकम्। एतच्छ्रुत्वा राजा परमदुःखितो भूत्वा मुर्च्छितः सञ्जातः। रामं द्रष्टुं तं चाभिभाषितुं समर्थो नाभवत्। ततः कैकेयी तं सर्वमकथयत्। रामोऽत्र स्फुटं कथयति-

**अहं हि वचनाद् राज्ञः पतयेमपि पावके।**
**भक्षयेयं विषं तीक्ष्णं पतयेमपि चार्णवे।।**
**नियुक्तो गुरुणा पित्रा नृपेण च हितेन च।**
**करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते।।**

स सहर्षं सर्वं परित्यज्य वनगमनार्थमुद्यतः सञ्जातः। स पूर्ववद् देदीप्यमान आसीत्। रञ्चमात्रमपि चित्तविक्रिया नावलोकिता तस्य गात्रे-

**न चास्य महतीं लक्ष्मीं राज्यनाशोपकर्षति।**
**लोककान्तस्य कान्तत्वाच्छीतरश्मेरिव क्षयः।।**
**न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम्।**
**सर्वलोकातिगस्येव लक्ष्यते चित्तविक्रिया।।**

परमभ्रातृभक्तो भरतो रामं राज्यस्वीकारार्थं भूयिष्ठं प्रार्थयामास, परन्तु विस्तृतवार्तावसाने रामेण स्फुटमुक्तम्-

**लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान् वा हिमं त्यजेत्।**
**अतीयात् सागरो वेलां न प्रतिज्ञामहं पितुः।।**

स प्रतिज्ञापालनसम्बन्धे अरण्यकाण्डे सीतां निःसङ्कोचं भणति-

**अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम्।**
**न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः।।**

रामः भ्रातृप्रेमी अस्ति। भीषणयुद्धकाले एकदा लक्ष्मणो मुर्च्छितः सञ्जातः। तस्य सञ्जीवनार्थं बलिष्ठो मनोजवो वायुसूनुः हनुमान् औषधिपादपानि आनेतुं हिमालयपर्वतं गतवान्। अर्धरात्रिः गता। तावत्कालं पवनात्मजो नागतः। शोकाभिभूतो रामो भ्रातृप्रवरं लक्ष्मणं स्वाङ्के निधाय भृशं रोदनं करोति। तस्य परममार्मिकोऽयमुद्गारो विश्वस्य कं सहृदयं भावविह्वलं न करोति-

**देशे देशे कलत्राणि देशे देशे च बान्धवाः।**
**तं तु देशं न पश्यामि यत्र भ्राता सहोदरः।।**

एतस्मिन्नेव काले वायुसूनुः सपर्वतमौषधिपादपानि आनीतवान्। विश्वविख्यातो वैद्यराजः सुषेणः अह्नाय लक्ष्मणस्य उपचारं कृतवान्। स झटित्येव मूर्च्छां परित्यज्य स्वस्थो भूत्वा महीतलाद् उदतिष्ठत्। ततः स लक्ष्मणं गाढमालिङ्ग्य वचनमिदमब्रवीत्-

दिष्ट्या त्वां वीर पश्यामि मरणात् पुनरागतम्।

**न हि मे जीवितेनार्थः सीतया च जयेन वा।**
**को हि मे जीवितेनार्थस्त्वयि पञ्चत्वमागते।।**

रामः शरणागतरक्षकः। शरणागतस्य विभीषणस्य रामेण रक्षा कृता। तत्प्रसङ्गे रामेण स्वसिद्धान्तोऽपि प्रकाशितः-

**सकृदेव प्रपन्नाय तवास्मि च याचते।**
**अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम।।**
**आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया।**
**विभीषणो वा सुग्रीवो यदि वा रावणः स्वयम्।।**

महर्षेर्वाल्मीकेर्दृष्टौ सच्चरित्रमेव मानवताया निकषोपलः तद्युक्तस्य नरस्यान्वेषणं तस्य विशदवर्णनमेव रामायणस्य सर्वप्रधानं लक्ष्यम् निर्मलचरित्रेणैव मनुष्यो देवत्वं भजते। एतादृशस्य चरित्रस्य परिपूर्णविकासो मर्यादापुरुषोत्तमे रामचन्द्र एव दृष्टिगोचरो भवति, तस्य चरित्रमेव आर्यचरित्रस्य परमादर्शोऽस्ति विद्यते च मानवतायाः चरमाभिव्यक्तिः।

# वर्तमानसन्दर्भेषु विश्वस्य सन्मार्गदर्शकः श्रीरामः



डॉ.कंचनतिवारी, सहायकाचार्यः,
उत्तराखंडसंस्कृतविश्वविद्यालयः,
हरिद्वारम्

संसारपाशबद्धनां सुबहूनि दुःखानि विविधकारणैः वर्तमानकाले प्रवृद्धिं गतानि सन्तीति सकलजगतः सिंहावलोकनेनैव सहजतया ज्ञायते । पर्यावरणविक्षोभः,पारिवारिकिद्वन्द्वः, आतङ्कवादः, रोगवृद्धिः,धार्मिकोन्मादः , राष्ट्रेषु परस्परं युद्धं, मानवेषु मानवीयगुणानां ह्रासश्चेत्यादीनि बहूनि नित्यं वर्द्धमानानि दुःखानि दुःखकारणानि च विश्वस्मिन्विश्वे सर्वत्र व्याप्तानि सन्ति ।

लोके विद्यमानानां सर्वेषामपि वस्तु - व्यक्ति-क्रियादीनां केचन विनियामकधर्माः भवन्ति । धर्मच्युतेषु तेषु विकृतिः दूषणं वा जायते। इत्थं दुःखानां मूलकारणं सर्वत्र स्वधर्मभ्रष्टता भवति । भोजनसामग्रीषु, भूमिवायुजलादिषु, राजनीतौ, व्यापारे, पत्रकारितायां, शासकेषु ,तदीयक्रियासु अन्येष्वप्येवं प्रभृतिषु या न्यूनता अधुना दृष्टिपथमायाति समनुभूयते वा तत्तत्पदार्थस्य स्वविषये धर्मभ्रष्टता एवात्र कारणम्। श्स्वधर्मे निधनं श्रेयः परधर्मो भयावहःश्इत्यास्यापि संगतिरत्र जायते।

वेदमूलायां भारतीयज्ञानविज्ञानपरम्परायां तत्त्वान्वेषकाः मनीषिणः ऋषयोऽभूवन् यैर्वेदानामुपनिषदादीनाञ्च ज्ञानोदधिम् इन्द्रियनिग्रहपूर्वकं निर्मथ्य जनसामान्यस्य लाभाय सरलया सरसया च गिरा विपुलं साहित्यं प्रणीय लोकस्य मार्गः प्रसाधितः । समये-समये संकटग्रस्तो लोकः सन्मार्ग- प्राप्तये इदमेव साहित्यमाश्रयते। वेदादारभ्य लौकिकसाहित्यपर्यन्तं सकलमेव संस्कृतवाङ्मयं धर्मवर्णनपूर्वकं धर्मिवर्णनं करोति कारयति च। स्वयं परमात्मनाऽपि धर्मसंस्थापनाय एव मनुजावतारो गृहीतः- यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।

भगवतः परमात्मनः लोकोत्तरत्वं

सर्वेषां धर्माणामाश्रयत्वेन सर्वधर्मविरहितत्वेन चोभयथा वर्तते। साकारतया मनुजादीनां रूपं स्वीकृत्य सर्वेषां धर्माणामाश्रयो भूत्वा स्वयं परमात्मा प्रतिष्ठितोऽस्ति।श्रीरामकृष्णादिरूपेण सगुणस्वरूपे अवतीर्य लोके परमात्मना एव धर्मः स्थाप्यते।

लोकमानसे श्रीरामः परमात्मनो योगेश्वरस्य

क्रियावतारः अस्ति । एतस्मादेव विविधाः क्रियाः, व्यवहाराश्च सम्पाद्य तत्र धर्मप्रतिष्ठापनया मर्यादां प्रतिष्ठापयति, मर्यादापुरुषोत्तमश्चेति संज्ञां लभते ।

वेदैरपि श्रीराम एव वेद्योस्ति-

वेदवेद्ये परे पुंसि जाते दशरथात्मजे।

वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना।।

लौकिकसाहित्ये श्रीरामस्यैव नायकत्वं सर्वत्र कथानकेषु मर्यादारूपौचित्यस्य निर्वाहं करोति ।

यदा साररूपेण कृत्याकृत्यविषये ज्ञातव्यं भवति तदा सर्वस्यापि विषयस्य उचितानुचितबोध पूर्वक-कर्त्तव्यमार्गोपदेशाय रामादिवत् प्रवर्तितव्यमित्येव तत्त्वं मिलति।

इत्थं वर्तमानजगतः कृतेऽपि सर्वेषु व्यवहारेषु, सर्वासु क्रियासु,व्यक्तिषु च धर्मप्रतिष्ठापनाय श्रीरामस्यैव आदर्शं स्वीकृत्य सन्मार्गप्राप्तिः सुलभा।

श्रीरामः सर्वं व्याप्नोति । वर्तमानसंदर्भेषु विश्वस्मिन् विश्वे व्याप्तानां समस्यानां समाधानमपीदमेवास्ति। यतो हि धर्मच्युतानां समुद्धाराय तेषु पुनर्धर्मप्रतिष्ठापनाय च परमात्मन एव सामर्थ्यमस्ति।परमात्मना प्रतिज्ञायते-

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्मसंस्थापनार्थाय सम्भवामि युगे-युगे इत्यादिवचोभिः स्वस्य धर्मसंस्थापकतां प्रबोध्य धर्मविषयिणीं स्वस्यैव सर्वतन्त्रस्वतंत्रतामपि प्रख्यापयति-

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।

'वासुदेवः सर्वमिति' कथनमाधृत्येदं धर्मविषयेऽपि सुस्पष्टमेव यद् भगवान् सकलधर्मस्य एकमात्रमायतनमस्ति।

श्रीरामस्यैव विषये कथनमस्ति- 'रामो विग्रहवान् धर्मः' इति।अतः संसारस्य विविधविग्रहेषु धर्मसंस्थापनायापि श्रीराम एव प्रभवति ।

सम्प्रति कलियुगे संसारदुःखोच्छेदकाः वेदोक्तमार्गाः क्षीयमाणाः सन्तीति सतां, शास्त्राणाञ्चेति समानं मतमस्ति।वेदमार्गबहिष्कृते घोरे कलियुगे प्राप्ते पाखण्डत्वस्य प्रसिद्ध्या अधर्मनिरतानां विविधपीडाः स्वाभाविकतयैव भविष्यन्ति। कामविकाराणां प्रबलता, शरीरे मानसे च रोगाणां बाहुल्यं,नैतिकमूल्यानां ह्रासः, यातायातदुर्घटना इत्यादिषु विविधवेदनासु पतितो मानवः प्रतिक्षणं कष्टमनुभवति।

स्त्रीणामाचारव्यवहारेषु परिवर्तनानि, मिथ्याभाषणादयो व्यवहाराः, गुरुणामपि लोलुपता, द्विजानामपि पापाचरणप्रवृत्तिः,वर्णाश्रमव्यवस्थालोपादयश्च दुखाय कारणतां प्रतिपद्यन्ते । एतेषां विषयाणां चर्चा रामायणादिषु पूर्वमेव समयसङ्केतपूर्वकं कृता विद्यते ।

विविधेषु राजनीति-समाज - व्यक्तिप्रभृतिषु विषयेषु विचारशीलाः तत्त्ववेत्तारः ऋषयः प्रश्नोत्तरक्रमे परस्परं संवादं कृत्वा मर्यादास्थापनाय कष्टनिवारणोपायानाम् अन्वेषणाय च पुरा एव निर्देशितवन्तः ।

यथा रामायणे-

धोरे कलियुगे ब्रह्मन् जनानां पापकर्मिणाम् ।

मनः शुद्धिविहीनानां निष्कृतिश्च कथं भवेत्।।

एवमेवान्यत्रापि एवंविधः चर्चाक्रमो बाहुल्येन मिलति। तदनु कस्यचिदादर्शस्य वर्णनया समाधानक्रमे विचारप्रवाहः चलति । वर्णितेषु आदर्शेषु श्रीरामस्य लोकजीवनं सर्वाधिकविशिष्टतया सर्वाङ्गपूर्णतया च पालनीयधर्मबोधं क्रियात्मकरूपेण जीवनस्य सर्वेषु पक्षेषु करोति कारयति च।

कविकुलगुरुः कालिदासः श्रीरामस्य व्यावहारिकं स्वरूपं तथा दर्शयति यथा तस्य धर्मसंस्थापनाय क्रियावतारः सिद्धो भवति । पुत्रधर्माः, शिष्यधर्माः, भ्रातृधर्माः, प्रजाधर्माः, युद्धधर्माः, परिवारधर्माः, पतिधर्माः ,ज्येष्ठकनिष्ठप्रभृतिधर्माः, तपस्विधर्माः, कुमारधर्माश्चेत्यादयो ये केऽपि विविधव्यवहारकालिका धर्माः सम्भवन्ति तेषां युक्तपालना रामस्य जीवने मिलति।

बालानां सम्यक्चरित्रनिर्माणं कथं भवेदिति वर्तमानसमयस्य सर्वाधिको महत्वपूर्णः प्रमुखश्च प्रश्नः। श्रीरामस्य आदर्शं स्वीकृत्य अत्रेदं समाधानं मिलति यद् बालानां सम्यक्चरित्रनिर्माणाय व्यक्तित्वनिर्माणाय च वरिष्ठजनानां प्रभावशालिनी भूमिका भवति । यादृशं वरिष्ठा आचरन्ति तथैव कनिष्ठानां परवर्तिनां वा जीवननिर्माणं भवति । रघुवंशमहाकाव्ये वर्णितं यत् श्रीरामस्य रामत्वनिर्माणाय महत्वपूर्णभूमिका तदन्वय-शुद्धेरस्ति । यथा लिखति कालिदासः -

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।

आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ।।

यथाविधिहुताग्नीनां यथाकामाचितार्थिनाम् ।

यथाऽपराधदण्डानां यथाकालप्रबोधिनाम् ।।

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।

यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।।

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।

वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।।

रघूणामन्वयं वक्ष्ये ..।इति।

यदि कुलपुरुषाः पूर्वजाः, वरिष्ठाश्च एवंप्रकारेण सर्वेषु व्यवहारेषु युक्ततया व्यवहरिष्यन्ति चेद् बालेषु रामत्वं वर्तमानकालेपि सहजमागमिष्यति, न संशयः। संसारस्य दुःखनिवृत्तेरिदमेव परमं साधनमस्ति। विशेषेण वर्तमानसन्दर्भेषु यतो हि बालेष्वेव भविष्यं तिष्ठति।

श्रीमद्भगवद्गीतायामपि दुःखनिवारणायेद- मेवोपदिष्टमस्ति -

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु । युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ।।

सर्वेषु कालेषु ,सर्वत्र च सुखसमृद्धिलाभाय कष्टनिवारणाय क्रियमाणेषु कर्मसु युक्तारूपः योग एव कारणम्। अस्य प्रायोगिकं रूपं श्रीरामस्य जीवने कर्त्तव्यपरिपालनकाले मिलति । अतः श्रीराम एव लोकव्यवहारस्य योगेश्वरः। फलितरूपेण श्योगी भवश इत्यस्य तत्वार्थः श्रीरामस्य गुणान् अनुसर इति भवति ।

साम्प्रतिके विश्वे शिक्षा-व्यवसाय- भोजन - वस्त्र- आवासादिषु विषयेषु समुचितव्यवहारमर्यादाया अभाव एव पर्यावरणादिषु प्रदूषणसमस्यां जनयित्वा विविधरोगाणां प्रादुर्भावञ्च कृत्वा विश्वं पीडयति। श्रीरामः कुलपरम्परात एवात्र विषये वर्तमानजगतः कृते सन्मार्गं दिशति ।

सर्वत्र विश्वे मानवग्रामस्य यत्ना धर्मार्थकामादीनां पुरुषार्थानां प्राप्तये भवन्ति । धर्मगर्भितां मर्यादां विना पुरुषार्थप्राप्तिरपि विकृतायते । प्राप्तेनार्थेनार्थजन्यं सुखं नास्ति,प्राप्तेन कामेन कामजं सुखं नास्ति । यदि कदाचित् सुखं प्रतिभाति चेदप्यचिरमेव दुःखकारणेषु परिणमते। अतः पुरुषार्थसुखलाभाय अनुष्ठीयमानेषु यत्नेषु मर्यादा, धर्मो वा परिपालनीय एव । श्रीरामस्य व्यक्तित्वं लोकव्यवहारकथाश्च सर्वाधिकप्रासङ्गिकरूपेण सर्वेषु कालेषु अनुष्ठीयमानेषु यत्नेषु मर्यादायाः, धर्मस्य वा परिपालनाय विश्वस्य मार्गदर्शनं कुर्वन्ति। यदुक्तमादिकविना-

धर्मार्थकाममोक्षाणां हेतुभूतं महाफलम्।

किं वा रामायणेन वर्तन्ते सुतरां ये जगद्धिताः।।

श्रीरामस्य गुणानां यद्वर्णनं समस्ते वेदप्रमाणके भारतीयवाङ्मये वर्तते तेन वर्तमाने प्रचलितेषु सर्वेषु विविधव्यवहारेषु रतानां नानाऽवस्थापतितानां मनुष्याणां कृते कल्याणप्रदः कर्त्तव्याकर्त्तव्यनिर्णायको विवेको मिलति। जनस्य वैयक्तिकं जीवनं कथं सुखशान्तिपूर्णं भवितुं शक्नोति इत्यत्र श्रीरामस्य निदर्शनं प्रमाणमस्ति-

स च नित्यं प्रशान्तात्मा मृदुपूर्वं च भाषते।

उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते।।

एवमेव स्वव्यवहारैः सर्वत्र कृतज्ञता,परोपकारः, विद्यावृद्धोपसेवा, सदाचारः, बुद्धिकौशलं, विक्रमः, सत्यप्रियता, प्रजावत्सलता, कामक्रोधादिविकारमुक्तता चेत्यादीनां सद्गुणानां प्रक्रियागतरूपं परिपाल्य श्रीरामः सर्वकष्टहरस्य रामराज्यस्य सन्मार्गं ज्योतिर्वा लोकाय प्रयच्छति । यदुक्तम्-

स तु श्रेष्ठैर्गुणैर्युक्तः प्रजानां पार्थिवात्मजः।

वहिश्चर इव प्राणो बभूव गुणतः प्रियः।।

यदि वर्तमानमानवः स्वस्य नानाव्यवहारेषु श्रीरामस्येमान् गुणान् परिपालयितुं यतते चेद् विश्वसमाजस्य सकलाः समस्याः समाधानं प्राप्स्यन्ति। पर्यावरण-राजनीति-अर्थनीति-लोकप्रशासन-वैश्विकराष्ट्रियप्रान्तीयसामाजिकपारिवारिकसम्बन्धप्रभृतिषु क्षेत्रेषु भ्रष्टाचारव्याजेन प्रसृतस्य धर्मच्युतिरूपस्य दुःखबीजस्य वर्तमानवैश्विकपरिप्रेक्ष्ये

निर्मूलनाय भगवतः श्रीरामस्य प्रशस्तं जीवनदर्शनमेव शरणम् ।

पुण्या पुरी श्रीअयोध्या इदानीं श्रीरामस्य भव्यं मन्दिरं पुनः प्रतिष्ठापयतीति विश्वे सकलजनसुखदायकस्य श्रीरामराज्यस्य नवनिर्माणाय शुभः सङ्केतः। अवसरेऽस्मिन् सर्वैः सम्भूय श्रीरामस्य लोकादर्शाः अधिकाधिकं प्रसारणीयाः, शिक्षणीयाः, परिपालनीयाश्च। सत्यमेवाह भवभूतिर्यद् आद्यानामृषीणां वाचमर्थोनुधावतीति।वर्तमानसंदर्भेष्वपि वैश्विकरूपेण सन्मार्गप्राप्तये इदमेव लभ्यते-

श्रीरामः शरणं समस्तजगतां

रामं विना का गतिः ।। इति शम् ।।

# भगवान् रामः अजस्रप्रेरणायाः स्रोतः



डॉ. हरीशदासः
सहायकआचार्यः
स्नातकोत्तर-संस्कृत-विभागः
पटना-विश्वविद्यालयः

भारतीयसंस्कृतौ भगवान् श्रीरामः परब्रह्म, विष्णोःअवतार, मर्यादापुरुषौत्तमश्चेति रूपत्रये: वर्णितोऽस्ति। असौ एक अनीहः अरुपः अनादिः निरुपाद्यिश्चेति निर्गुणब्रह्मदृशा। सत्यपि विश्वरुपत्वे एकदेशीयः, साकारश्चेति महाविष्णुत्वेन नात्रसंशयः। भक्तानाम् सम्मुखे अनन्तनाम-धाम-लीला-रूपादिभिः सत्त्वात् अवतारभेतो वर्तते। प्रकटिताश्च भवन्ति। विशिष्टरूपलीलानामादीषु। आदर्शपुरुषश्च मर्यादापुरुषोत्तमरूपेण आकृतिप्रकृतिपरिस्थितिष्वपि।

भारतवर्षे प्रख्यातसूर्यकुले सभुत्पन्नः राज्ञः दशरथस्य प्राणाप्रियः सुतश्चसीत्, माता च परमविवेकिनी कौशल्या। शास्त्राशिक्षा च अधिगताः महर्षिणा वशिष्ठेन। लक्ष्मणश्च भ्राताऽऽसीत्, सतीशिरोमणिसीता च अइमुता धर्मपत्नी। ब्रह्मविद्यासपन्नः विर्देहराजः राजा जनकः तस्यश्वसुरः, अतुलितवलसंपन्न हनुमान् चासीत अप्रतिमसेवकः। भित्राणि च आसन् सुग्रीवविभीषणादमः। त्रिलोकविजेता राक्षसराजरावणः परमशत्रुत्वेन आसीर्दित परमादर्शः नात्र संशीतिलेशः।

असौ परमाराध्याः, अध्यात्मसाधकश्चिति भक्ताना कृते। भगवाताभूतनाथनायि 'रामनाम' इत्यस्य उपदिष्टः मोक्षलाभाय काश्याम्। सर्वोषमपि भूतानाम् कल्याणाय रामनामेति कीर्तनमावश्यकमिति।

शाश्वतादर्शनम् मूर्तिमानरूपः भगवान राम न केवलं मर्यादापुरुषोत्तमः प्रत्युत् पूर्णब्रह्मणः अवतार भूतः। लौकिकालौकिकपक्षेषु श्रेष्ठः असौ भारतीय साधनाज्ञानपरंपरायाः वाग्द्वारः। लोके दृश्यते यत् कस्यापि नरस्य जन्मसमये तस्य जीवनगाथा गीयते यज्ञोपवीतविवाहादिक्षणे। भूतानां देहावर्सान च ''रामनामसत्य'' इति उच्चार्यते। महामानवरूपेण असौ भगवान् रामः सइप्रेरणायाः अजस्रस्रोतः। तस्मादेव कारणात् साधनादृशा ईश्वरस्य सर्वेणम् नामानाम् 'रामनाम' इत्यस्य महती अवर्णनीय सर्वोपरि चेति।

# आदर्शरूपश्रीराम:



**-आचार्यचद्रप्रकाशममगांई**
भूतपूर्व: महासचिव:, उत्तराखण्डविद्वत्सभा
सम्बद्ध:, कालिकाभवनम्, देहरादूनम्।

सनातनहिन्दुधर्मे भगवान् रामचन्द्र: भगवतो विष्णो: अवतार: आदर्शपुरुषस्य रूपेण लक्ष्यते। तस्य चारित्र्ये तादृशवैशिष्ठ्यं विद्यते यादृशवैशिष्ठ्यं स्वीये व्यवहारे समाचर्य जन: प्रत्येकं समस्यां समाधातुं शक्नोति। प्रभुणा श्रीरामेण कदापि स्वमर्यादा नैव उल्लङ्घिता। अत: स: मर्यादापुरुषोत्तम: उदीर्यते। अद्यतने युगे प्रभुश्रीरामस्य चारित्र्याद् काश्चन शिक्षा: ग्रहीतुं शक्या:। यद्यथा-

पित्रो: आज्ञापालनम्- ज्यैष्ठपुत्रत्वात् श्रीरामाय राजसिंहासनं दातव्यम् आसीत् परं मातुर्कैकय्या: आदेश: पालयता तेन राज्यस्य स्थाने वनगमनम् अङ्गीकृतम्। एतन्नाम पित्रो: आज्ञापालनमेव सन्तते: परमो धर्म: ।

ध्यैर्यशीलताया: परमम् उद्धरणम्-अद्यत्वे प्रत्येकस्मिञ्जने ध्यैर्यस्य अभावो लक्ष्यते। येन मनुष्याय बहव्य: समस्या: उत्पद्यन्ते। श्रीरामेण मातुर्कैकय्या: आदेश: पूर्णध्यैर्येण स्वीकृत:। समुद्रे सेतुं निर्मातुं महत्तप: आचरितम्, एक: राजा सन्नपि मात्रा सीतया सह वनवासे सन्यासी इव जीवनं यापितम् इत्यनेन समग्रव्यवहारेण भगवतो रामस्य परमं ध्यैर्यं परिलक्षितं भवति।

आदर्शभ्रातु: प्रतीक: प्रभू राम:-आदर्शपुत्रेण सह आदर्शभ्रातुरपि उद्धरणभूतोऽपि विद्यते। साम्प्रतिके युगे सहोदरा: परस्परं शत्रुतया व्यवहरन्ति। परं श्रीरामचन्द्रस्य अनुजो भरत: तम् आयोध्यां नेतुं यदा आगत: तदा स: पित्राज्ञा सर्वोपरि मत्वा राजसिंहासनं भरताय एव प्रदत्तम्।


मित्रता - वने निसवन्नपि श्रीराम: इव मित्रं न भूतो न भविष्यति केवट:, सुग्रीव:, विभीषण: इत्यादय: अस्य मित्राणि आसन्। स्वयमेव तेषां कष्टान्यपि सोढवान्। भेदभावेन विना तेन सर्वै: सह मित्रवद्व्यवहार: समाचरित:।

अस्माकम् आराध्ये भगवति श्रीरामचन्द्रे अनेके आदर्शगुणा: विद्यन्ते। सांसारिकजीवने अग्रे वर्धयितुं , ख्यातिं कीर्तिं च लब्धुं, यश:प्राप्तये च सद्गुणानाम् उत्तमकार्याणां च महती भूमिका भवति यत: गुणा: एव कञ्चन जनं विशिष्टं विलक्षणप्रतिभायुतं च निर्मान्ति। जन: स्वीयजीवने सफलताम् अवाप्तुं केषु गुणेषु ध्यानं दद्यात् इत्येतद् रामायणे श्रीरामचन्द्रस्य चारित्र्यमाध्यमेन बोधितम्। तेन मानवीयरूपेण प्रत्येकं जनस्य विश्वास: स्वेन आचरणेन असाधारणगुणैश्च समर्जित:। वाल्मीकिरामायणे श्रीरामचन्द्रस्य आदर्शनैतिकगुणानां चर्चा विहिता। ये नेतृत्वक्षमताम् उत्पादयितुं कस्मिंश्चिदपि क्षेत्रे अग्रगामितां सम्पादयितुं च मुख्यसूत्राणि वर्तन्ते। आदर्शरूपेण भगवच्छ्रीरामचन्द्रस्य अनेके गुणा: सन्ति ते च यथा - गुणवान्, ज्ञानी, कलाकुशल:, सर्वस्यापि अनिन्दक:, सकारात्मकचिन्तनशील:, कृतज्ञ:- विनम्र:, आत्मीयभावेन पूर्ण:, सत्यव्रत:, सत्यवादी, सद्व्यवहारशील:, हृत्प्रतिज्ञ: दृढविश्वासयुत:, सदाचारी, आचारे विचारे च सद्व्यवहारयुक्त:, सर्वभूतसहायक: , बुद्धिमान्, विवेकशील:, सामर्थ्यवाली , सर्वेषां विश्वसनीय:, प्राप्तसमर्थन:, सर्वेभ्य: प्रियदर्शन:, मनोनिग्रही, ध्यैर्यवान्, व्यसनान्मुक्त:, जितक्रोध:, सहज:, शान्त:, कान्तिमान् उत्तमव्यक्तित्वपूर्ण:, वीर्यवान्, स्वस्थ:, संयमी, हृष्ट-पुष्ट:, युद्धे देवेष्वपि भयोद्पादक:, उत्साहयुक्त:, दुर्व्यवहारनिग्रही च इत्येते भगवद्गुणा: अस्माभि: ग्रहणीया:।

यद्यपि भगवत: श्रीरामस्य विषये मनुष्यबुद्धि: विचारयितुं नैव सक्षमा तथापि भगवदनुग्रहेण किञ्चिदत्र भगवतो गुणानुवाद: तावद्विहित: ।

जयतु श्रीरामचन्द्र:

# रामो राजमणि: सदा-विजयते



**-गोपीनाथपारीक:**
21, रामेश्वरधामपरिसर:
मुरलीपुरा-जयपुरम्-302039

आदर्शानां निधिरिति श्रीराम: सर्वे वयं जानीम: । तच्चरिचेन सर्वविद्यां शिक्षां वयं प्राप्नुयाम:। आज्ञाकारीपुत्ररूपे सदैव पूज्यते मर्यादा-पुरुषोत्तमोऽयं राम:। मातरं कौसल्या कथयति राम:-

**नास्ति शक्ति: पितुर्वाक्यं समतिक्रमितं मम।**
**प्रसादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम् ।।**

-वा०रा० २-२१-३०

रामो रावणं हत्वा यदा अयोध्यायां प्रत्यावर्तित: तदा सर्वाग्रहेन राज्यारूढ: वभूव। तस्य राज्यं प्रतिष्ठितं प्रजाराधने सत्य प्रतिज्ञत्वे च । प्रजा-सुखार्थमेव रामस्य जीवनम्। रामराज्ये सर्वे जना: धर्मपरायणा: सुलक्षणसम्पना: शोकशून्याश्व प्रचरन्ति स्म । प्रजावत्सलतया राम: सर्वोपरि: राजा सिध्यते। य: राजा प्रजापीडनं सम्पद्यते स: राजा कथं भवेत्? महर्षे: याज्ञवल्क्यस्य कथनम्-

**प्रजा पीडनसन्तापात् समुद्भूतो हुताशन:।**
**राज्यं कुलं श्रियं प्राणान्नादग्ध्वा विनिवर्तते।।**

धर्मपरायणे राज्ञि अष्टलोकपालाना-मंशा: सुशोभिता: सन्ति । इन्द्र: कुबेर: वरुण: चान्द्र सूर्य: यमोऽग्नि: पवन श्वैतेऽष्ट लोकपाला: सन्ति। ऐतेषामंशेन राज्ञ: निर्माणं भवति। अयमार्यशास्त्रस्य। सिद्धान्त:। इन्द्रस्यांशेन राज्ञि प्रभुत्वशक्ति: जायते। कुबेरस्यांशेन धनार्जनशक्ति: जायते। वरुणस्यां- शेनावश्यकतानुसारेण प्रजायै धनदानशक्ति: समा-याति। चन्द्रस्यांशेन प्रजायै सुखसम्पादनशक्ति: प्रजायते। सूर्यस्यां शेन प्रजायां ज्ञान विद्याप्रसारशक्ति: प्रभवति। यमस्यांशेन न्यायानुकूलिनी विचार शक्ति: समायाति। अग्नेरंशेन पवित्रता प्राप्तुं भवति। पवनस्य चांशेन गुप्तचराणां सहायतया प्रजाया: कुशलताया: नीतिं राजा प्राप्नोति । एवं प्रकारेणाष्टगुणविभूषितो राजा प्रजा वत्सल: प्रजारज्जकश्च भवितुं शक्नोति।

राज्ञ: रामस्य कृतेऽत्र वर्णिता: सर्वा: शक्तय: सुशोभिता: तस्मात् कारणात् रामोराजमणिरिति। अत: सदा विजयते राम:। एतादृशाय तस्मै रामाय नम:।

# रामस्य राजनीतौ सहिष्णुता



**-प्रमोद:भारतीय:**
-सहाचार्य: अध्यक्षश्च, संस्कृतविभागे
म्युनिसिपलपोस्टग्रेजुएटकॉलेजे, मसूरी,
देहरादूनम् (उत्तराखण्डम्)

रामस्य विषये जनश्रुतीयमिदानीमपि व्याप्ताऽस्ति यद् रामस्य राज्ये सामाजिकसहिष्णुताया: कृते प्रभूतसंभावनाऽऽसीत्। सर्वे निवासिनां पार्श्वे राज्यस्य नीते: निन्दाया अधिकारोप्यासीत्। एको विवेकहीन: रजकोपि रामस्य व्यवहारस्य विषये टिप्पणीं कृतवान्। राजा राम: तस्य रजकस्य कथनस्य प्रतीकारं न कृतवान्। तस्य विचारं स्वीकृत्य तेन स्वकीयाया: गेहिन्या: परित्याग: कृत:। गेहिन्या: वियोगे राजकीयशय्यां परित्यज्य भूमौ शयनमकरोत्।

यदा माताकैकेयी रामस्य निर्वासनस्य कृते स्वकीयाभिलाषामुक्तवती महाराज्ञ: दशरथस्य दु:खस्य नासीत् काऽपि सीमा। परं तदानीमपि राजा राम: किञ्चिदपि विचलितो न जात:। तदानीमेव तेन घोषितं यद् स: सद्य: वनगमनं करिष्यति।

यदा सरयूनदीतीरे केवटस्य नौकाया आवश्यकता समायाता तस्य स्वीकृति: न जाता। तत्र राम: कुपितो न जात:। तत्र रामेण केवटस्य प्रति सम्मानं प्रकटितम्। रामेण तदानीं नौकाद्वारा नद्या: पारं गमनस्य कृते केवटस्य मनुहार: कृत:।

यदा रामस्य गेहिन्या सीताया रावणेनापहरणं कृतं लंकागमनस्य कमे मार्गे समुद्र आसीत्। समुद्रेस्यान्यत् पक्षे आसीद् लंकानगरी। तर्हि रामेण समुद्रं प्रति याचना कृता मार्गस्य कृते। परं यदा समुद्रगेण मार्गं न प्रदत्तं रात्रित्रयं यावत् तस्यानुनयं विनयं च कृतवान् राम:।

यदा रामेण रावणो हत: अन्तिमसमये तेन लक्ष्मण आदिष्ट: यद् स: रावणस्य समीपं गत्वा किचिद् ज्ञानं प्राप्नोतु। सामान्यतया शत्रुपक्षस्य कृते कोऽपि ईदृशं व्यवहारं न करोति। परं राम आसीदेकोऽपवाद:।

इदं श्रूयते यदेकदा कुक्कुर एक: एकेन साधुना लगुडेन ताडित:। तदा कुक्कुरेण अयोध्यापते: न्यायालये परिवाद: प्रस्तुत:। तदा रामेण लक्ष्मणो नियुक्त: परिवादस्य निर्णयार्थम्। परं कुक्कुरोऽयं महाराज्ञ: रामस्य समक्षमेव स्वकीयस्य परिवादस्य प्रस्तुत्यर्थं निवेदनं कृतवान्। कुक्कुरस्येदृशमाग्रहं दृष्ट्वा श्रीराम: स्वयमेव तत्र कुक्कुरसय समक्षमवतरित: तस्य परिवादं श्रोतुम्।

ईदृशान्यनेकानि सन्त्युदाहरणानि रामस्य जीवने ये तस्य सहिष्णुताया: वर्णनं कुर्वन्ति। अर्वाचीनभारतवर्षेऽपि रामस्य सहिष्णुताया अनुसरणं कर्तव्यम्। राजनेतारोऽधुना केवलं मतमनुसृत्येव व्यवहारं कुर्वन्ति। व्यवहारेऽस्मिन् रामराज्यस्य कल्पना कर्तुं न शक्यते।

# रामायण- महाकाव्ये रम्या रामायणी कथा.....



**- डॉ. अनन्तमणित्रिवेदी**
मानवभारती-विद्यालय:
देहरादूनम्

**कथंचिदुपकारेण कृतेनैकैन तुष्यति।**
**न स्मरत्यपकाराणां शतमप्यात्मवत्तया ।।**
**दद्यान्नप्रति गृह्णीयान्न ब्रूयात् किंचिदप्रियम्।**
**अपि जीवित हेतोर्वा राम: सत्यपराक्रम:।।**

- वाल्मीकि- रामायणम् लोके यथा प्रचलितमस्ति रामायणं नाम महर्षि- वाल्मीकि कृतमादिकाव्यमस्ति। एतन्महाकाव्यं सप्तभि: सुन्दरै: काण्डै: पंचशत- सर्गै: चतुर्विंशति- सहस्रैश्च श्लोकैरूपनिबद्धमस्ति। रामायणस्य भाषा सरला सुमनोहरा प्रसादगुणगुम्फिताचास्ति। अलंकाराणामनुप्रासोपमादीनां सुचारु परिपाकोऽत्र दृश्यते। करुणरस- प्रधानं भारतीयानामाचारशास्त्रमेतदस्ति। भारतीय- संस्कृते: सुन्दरतमं स्वरूपमत्रोपवर्णितम्।

रामायणे मानवानामन्त: प्रकृते: यादृशं स्वाभाविकं सूक्ष्मं सुन्दरं विश्लेषणं न तादृशमन्यत्रोपलभ्यते। वाह्य प्रकृतेपिरदृश्यानां यादृशं सजीवं निरूपणमत्रोलभ्यते तादृशमन्यत्र सर्वथा दुर्लभम्। भारतीय- समाजस्य सभ्यताया: प्रतिपादकं चिरन्तनमेतन्महाकाव्यमिति । अत्र मर्यादा- पुरुषोत्तमस्य पितु: निदेशकारिण: भगवतो श्रीरामभद्रस्य चारुचरित्रमकिंतम्। अतएव सुसंस्कृतज्ञ: श्री त्रिविक्रम भट्ट: कथयति यत् -

**सदूषणाऽपि निर्दोषा सरवराऽपि सुकोमला ।**
**नमस्तस्मै कृता येन रम्या रामायणी कथा ।।**
**श्रीमद्वाल्मीकि- रामायणे च.......**
**रामो विग्रहवान् धर्म: साधु: सत्यपराक्रम: ।**
**राजा सर्वस्य लोकस्य देवानामिव वासव:।।**

अयोध्यायां महाराज-दशरथस्य चत्वार: सुरूपा: सुशीला: सत्यसन्धा: राजपुत्रा: राम-लक्ष्मण-भरत-शत्रुघ्नाश्चासन् ।

तेषु राम-लक्ष्मणौ ऋषि: विश्वामित्र-यज्ञरक्षायै स्वाश्रयमनयत् अशिक्षयच्च नूतनास्त्र-प्रयोगान्। राम-लक्ष्मणौ तान् यज्ञविघ्नकारिण: राक्षसान् हत्वा ऋषि- विश्वामित्रेण सह जनकपुरीं गत्वा तत्र राम: सीताम् , लक्ष्मण: ऊर्मिलाम्, भरत: श्रुतकीर्तिम्, शत्रुघ्नश्च माण्डवीं पर्यणयत्। तत: प्रत्यावृत्य पितुरादेशेन राम: चतुर्दश- वर्षाणि सीतया सह अनुजेन लक्ष्मणेन च सह वनमध्युवास। एतेन पितृ निदेशानुवर्तनस्य, भ्रातु: लक्ष्मणस्य भ्रातृ स्नेहादर्शस्य, महाराज दशरथ: पुत्रवियोगेन प्राणान् तत्याज एतेन पुत्र वात्सल्यस्य साक्षादुदाहरणम्। भरत: कौशल- देशस्य प्राज्यं राज्यं राज्य लक्ष्मींच लब्ध्वापि तृणवत् मन्यमान: चतुर्दश- वर्षाणि नन्दिग्रामेऽवसत् । एतेन त्यागस्य परमं महत्त्वं दर्शितम्। इत्थं जगति पितुरादेशपालनस्य, भ्रातु: सेवा भावस्य, पुत्रवात्सल्यस्य त्यागस्य पातिव्रतधर्मस्य, एतेषां गुण गणानामेकत्र चेत्क्वापि समावेश: दृश्यते तद्रामायणे एव, नान्यत्र कुत्रापि विश्व- साहित्येऽधिगच्छाम:। नूनं रामायणे पितु: मातु: भ्रातु: भर्तु: भक्तीनां यथाक्रमं सन्निवेश: सुकुमार- मतीनां महान्तमुपकारं करोति। रामायणस्याध्ययनेन पुण्य कर्मणि मतिर्जायते। अत: परं सत्यं यत् धन्या खलु रामायण- महाकाव्ये रम्या रामायणी कथा।

**यावद् स्थास्यन्ति गिरय: सरितश्च महीतलम् ।**
**तावद् रामायणकथा लोकेषु प्रचरिष्यति ।।**

- वाल्मीकिरामायणम् (बालकांड २-३६)

रामायणस्य महत्त्वं वृहद्धर्मपुराण-स्कन्दपुराणादिषु जेगीयते। यथा बृहद्धर्मपुराणे कथितम् यत् -

**पठ रामायणं व्यास काव्यबीजं सनातनम्।**
**यत्र रामचरितं स्यात् तदहं तत्र शक्तिमान् ।।**

# सर्वेषां प्रियः मर्यादापुरुषोत्तमरामः



डॉ. मनीषाशर्मा
प्राचार्या, राजस्थानशिक्षकप्रशिक्षणविद्यापीठम्, जयपुरम्

भगवान् रामः सप्तमः विष्णोः अवतारः इति कथ्यते। त्रेतायुगे सः उग्रदानवहन्तुं रामरूपेण पृथिव्यां अवतारितवान् । गीतायां लिखितम् अस्ति–

यदा यदा हि धर्मस्य ग्लानिः भवति भारत, अभ्युत्थानमधर्मस्य तदा आत्मानं सृजामि अहम् ।

परित्राणाय साधूनां विनाशाय च दुस्-कृताम्, धर्म-संस्थापनाय सम्भवामि युगे युगे।।

यदा यदा हि धर्मस्य हानिः भवति, पापं च जगति चरमस्थाने भवति, तदा ईश्वरः ऋषीणां त्राणाय, धर्मस्य पुनः स्थापनायै च जगति अवतरति।

रावणस्य अत्याचारेण यदा समग्रं जगत् विध्वस्तं भवितुं आरब्धम्, तदा श्री हरिविष्णुः रामरूपेण पृथिव्यां प्रकटितुं निश्चितवान् ततः शुक्लपक्षस्य नवम्यां तिथौ सः अयोध्यायाः राजा दशरथस्य पुत्रः राज्ञी च अभवत् कौशल्या।जन्म।तेन सह आगताः भ्रातरः लखनः भारतः शत्रुघ्नः इति । राजा दशरथः कौशल्या सुमित्रा कैकेयी इति त्रीणि राज्ञीः आसन् ।

भगवान् रामः कौशल्या देव्याः पुत्रः आसीत्, देवी सुमित्रा लक्ष्मणः शत्रुघ्नः च इति द्वौ सुन्दरौ पुत्रौ जनयति स्म तथा च राजकुमारः भरतः कैकेयी देवीयाः पुत्रः आसीत् । श्रीरामः बाल्यकाले अनेकाः प्रकाराः बाललीलाः कृत्वा स्वत्रयमातृभ्यः मातृप्रेमस्य सुखस्य आनन्दस्य अवसरं प्रदत्तवान् । तदनन्तरं चत्वारः अपि भ्रातरः अयोध्याराजस्य गुरुवशिष्ठस्य शिक्षां प्राप्तवन्तः।

तदनन्तरं महर्षिः विश्वामित्रः तं स्वेन सह नीतवान् महर्षिः श्रीरामलक्ष्मणयोः दिव्यशस्त्राणि प्रदत्तवान् तदनन्तरं रघुनन्दन भगवान् श्रीरामः तद्का, सुभौ, तेषां समस्त सेनायाः च वधः अकरोत्। मरीचं शतयोजनदीर्घेण बाणेन निष्फलम्।

तदनन्तरं सः विश्वामित्रऋषिणा सह मिथिलां प्राप्य तत्र राज्ञः जनकस्य स्वयम्वरस्य व्रतं पूर्णं कृत्वा जनकाण्डिनी सीतायाः विवाहम् अकरोत् । देवी सीता महाराजजनकस्य, देवी सुनैनायाः च पुत्री आसीत्। महामाया लक्ष्मी सा तत्त्वतः पृथिव्याः जातः। श्रीरामेन सह तस्य अन्ये त्रयः भ्रातरः अपि सीतायाः भगिनीभिः सह विवाहिताः आसन् । विवाहसमाप्ते: अनन्तरं यदा सः अयोध्यानगरं प्रत्यागतवान् तदा कतिपयान् मासान् सुखेन व्यतीतवान् तदा राजा दशरथः राजकुमारः रामस्य राज्याभिषेकं कर्तुं निश्चितवान् ।

राज्ञी कैकेयी इत्यस्याः दासी मन्थरा इत्यस्याः कृते राजा दशरथस्य एतत् वस्तु न रोचते स्म अतः सा राज्ञी कैकेयी इत्यस्याः उत्तेजनं कृत्वा राजकुमारस्य रामस्य राज्याभिषेकं रात्रौ एव स्थगितवती । मन्थरस्य वचनेन प्रभाविता राज्ञी कैकेयी राजा दशरथात् वरद्वयं याचितवान् । प्रथमे कामने श्रीरामस्य स्थाने भारतस्य राज्याभिषेकं याचितवान् द्वितीये च श्रीरामस्य चतुर्दशवर्षस्य वनवासं याचितवान् ।

इति वचनं श्रुत्वा राज्ञः हृदयं गभीरं क्षतिं प्राप्य मूर्च्छितः भूमौ पतितः। यदा भगवान् रामः एतत् ज्ञातवान् तदा सः स्मितं कृत्वा पितुः आज्ञां पालयित्वा तत्सहकालं वनं प्रति अगच्छत्। यतः रघुकुलस्य परम्परा सर्वदा 'जीवनं म्रियते किन्तु वचनं न भवेत्' इति एव आसीत्।

यदा श्रीरामः प्रवासाय प्रस्थितवान् तदा तस्य मनसि किञ्चित् अपि कुरुका: नासीत् । सः पितुः मातुः च आज्ञां अनुसृत्य किमपि प्रश्नं न कृतवान् । एतेन कार्येण सः सम्पूर्णं मानवजातिं शिक्षितवान् यत् मातापितृणां आदेशान् सर्वदा पालनीयम्, ये जनाः स्वमातापितरौ अनादरं कुर्वन्ति ते कदापि ईश्वरस्य अनुग्रहं न प्राप्नुवन्ति।

तस्य पत्नी देवीसीता भ्राता लक्ष्मणः च श्रीरामेन सह निर्वासने अपि गतवन्तौ । तस्य अनुजः लक्ष्मणः तस्य समीपे छायावत् सदा । सः शेषनागस्य अवतारः आसीत् । निर्वासनकाले श्रीरामः अनेकानि कष्टानि सम्मुखीकृत्य जीवनस्य सर्वान् संघर्षान् सामान्यपुरुषवत् स्वीकृतवान् ।बहुभिः ऋषीभिः ऋषिभिः अपि मिलितवान् । रघुनन्दन राम ब्राह्मणों को बहु आदर करते थे।

निर्वासनस्य अन्तिमे वर्षे लङ्कायाः घ्राजा रावणः श्रीरामस्य पत्नीं छलेन अपहृत्य लङ्कानगरं नीतवान्। तदनन्तरं भगवान् रामः सीतादेव्याः अन्वेषणार्थं वैनतः वैनपर्यन्तं भ्रमति स्म ।एतस्मिन् समये सः शबरी इत्यनेन सह मिलितवान् यस्य माध्यमेन सः किष्किन्धाराजेन महारकसुग्रीवेण सह मित्रतां कृतवान् । अथ राजा सुग्रीवस्य वानरसेनायाः साहाय्येन श्रीरामः समुद्रं लङ्घ्य लङ्कां प्राप्य दुष्टं, अधर्मं, अनाचारं रावणं तस्य समग्रं राक्षसजातिं च हत्वा सीतां देवीं मुक्तवान्।

तदनन्तरं सः अयोध्याम् आगत्य अयोध्याजनाः महता धूमधामेन स्वागतं कृतवन्तः । दीपैः प्रज्वलितं पुते नगरं सर्वे अतीव प्रसन्नाः आसन् । अतः भारते प्रतिवर्षम् अयं दिवसः दीपावली इति आचर्यते । शुभस्य अशुभस्य विजयस्य सूचकदिनम् अस्ति।

भगवान् रामस्य चरित्रं आदर्शं चरित्रम् अस्ति। मानुषरूपेण आगत्य भगवान् मनुष्याणां कल्याणं कृतवान्। भ्राता पुत्रः पतिः पिता च इव प्रत्येकं सम्बन्धं आदरयति स्म। शिष्टाचारपाठं पाठयित्वा ततः संसारात् प्रस्थितः। अधुना जनाः विशेषतः युवानां पीढी लघुसमस्यासु अपि त्यजन्ति, आत्महत्या इत्यादीन् कानूनी अपराधान् कर्तुं सज्जाः भवन्ति, यदा यदा वेदना वा कष्टं वा अतिशयेन भवति तदा तदा ते मद्यपानं आरभन्ते।

तेषां सर्वेषां कृते भगवान् श्रीरामः प्रेरणास्रोतः अस्ति, यः सम्पूर्णजीवने केवलं कष्टानां सामनां कृतवान् परन्तु कदापि साहसं साहसं च न त्यक्तवान। स्वयं चिन्तयतु यत् प्रातःकाले अभिषिक्तः राजपुत्रः कथं अपराधं न कृत्वा रात्रौ एव निर्वासनं प्रेषितः भवति न केवलम् एतदनन्तरं तस्य भार्या अपहृता भवति, तस्य च सीतादेव्याः विरहेण वने वनं गन्तुं भवति। यदि इच्छति तर्हि रावणेन सह युद्धाय अयोध्यासेनाम् आहूतुं शक्नोति स्म किन्तु सः तत् न कृतवान्, एकहस्तः युद्धं कृत्वा विजयं प्राप्तवान्।

वर्तमानकाले मित्रापेक्षया शत्रवः अधिकाः सन्ति, अस्मिन् सन्दर्भे अपि भगवान् रामः मनुष्याणां कृते मैत्रीयाः उदाहरणं दत्तवान् अस्ति। सुग्रीवविभीषणयोः सह तस्य मैत्री उच्चवर्गस्य मैत्रीस्थानं प्राप्नोति । एतदतिरिक्तं सः जातिनाम्ना कदापि विवेकं न करोति स्म, सः सर्वान् समानान् मन्यते स्म। तस्य दृष्ट्या चोटः, महती समस्या वा नासीत् ।

अस्य उदाहरणं रामायणे अपि प्राप्यते। भगवान् रामः स्वमित्रं निषादराजगुहं सम्मानं कृत्वा तं आलिंगितवान् । सः नावपालस्य भक्तिविषये अतीव वीरः आसीत् तथा च साबरीजामुनाभक्षणेन यत् तृप्तिः प्राप्ता तत् अवध-मिथिलयोः षट्त्रिंशत् व्यञ्जनेषु अपि न प्राप्यते स्म।

श्री रामः निश्चिततरूपेण मर्यादापुरुषोत्तमः अस्ति। सः सर्वदा प्रत्येकं कार्यं सीमान्तरे एव अकरोत्, जीवनपर्यन्तं धर्ममार्गे च अचलत् । न हि तस्य पतित्वस्य चरितस्य शब्दैः वर्णयितुं शक्यते । श्री राम जी देवी सीता को सदा आदर करते थे। तेन सीतायाः एकपत्नीत्वस्य प्रतिज्ञा दत्ता आसीत्, तदपि प्रतिज्ञां पालितवती आसीत् । श्रीरामस्य कृते सीतां विहाय जगति प्रत्येका महिला अपरिचिता आसीत्।

विवाहस्य आदरं कृत्वा पतिपत्नीं विवाहस्तम्भद्वयं मन्यन्ते स्म । तेन सर्वलोकं स्त्रियाः आदरः उपदिष्टः, रावणस्य वधेन च एतदपि सिद्धं यत् यदा यदा लोके स्त्रियः अपमानिताः अवमानना च भवन्ति तदा अधर्मस्य अनैतिकानां च विनाशः निश्चितः भवति। रामः सीता च न भिन्नौ, एकौ। अत एव अद्यतनयुगे तेषां नामानि सर्वदा एकत्र संयोजिताः "सीताराम" इति उच्यन्ते।

श्रीरामस्य चरित्रं प्रथमं महर्षि वाल्मीकिना वर्णितम् । सः रामायणं रचितवान् यत् संस्कृतेन लिखितम् अस्ति। तदनन्तरं गोस्वामी तुलसीदासः रामचरितमानसे रामस्य कथां गायितवान् ततः अनेके जनाः श्रीरामस्य चरित्रं स्वकीयनुसारं वर्णितवन्तः। श्रीरामस्य चरित्रम् अपारम् अस्ति, तस्य वर्णनं सर्वेषां कृते न सम्भवति। रामकथस्य निरन्तरधारा सदा सर्वदोषाणां शुद्धिः।

यदि प्रत्येकः व्यक्तिः स्वजीवनात् किमपि शिक्षते वा स्वीकुर्वति वा तर्हि तस्य जीवनं सफलं भवति । भगवान् श्री रामः मम हृदयस्य अतीव समीपस्थः अस्ति। अहं तेषु विशेषतया प्रीतिमान् अस्मि, तेषु सर्वान् देवदेवतान् पश्यामि। रामः तादृशः मार्गः यस्मिन् राम एव सर्वदा गन्तव्यः यतः न तस्य सदृशः कोऽपि अभवत् न भविष्यति।

# श्रीरामविजयमहाकाव्ये मर्यादापुरुषोत्तमरामः

–लक्ष्मीकान्तविमलः
शोधाधिकारी
श्रीशंकरशिक्षयतनम्
वसंतविहारः, नवदेहली–५७

मिथिलामहीमण्डलस्य बहवः विद्वांसः जीवनयापनाय तीर्थभूतां मिथिलानगरीं परित्यज्यन्तः दूरदेशं समागतवन्तः। तेषां विदुषां कीर्तिगाथा न मिथिलादेशे लभ्यते न वा कार्यस्थले। एतादृशो विद्वान् रूपनाथोपाध्यायः आसीत्। तस्य महाकवेः द्वितीयः पुत्रः लक्ष्मणदत्तोपाध्यायः आसीत्। इदानीं रेवातटे महकवेः वंशजाः निवसन्ति।

अस्य महाकाव्यस्य प्रकाशनं १९३२ तमे खिष्टाब्दे पण्डितगणपतिलालझामहोदयस्य संपादनेन वाराणस्या राजकीयसंस्कृतमहाविद्यालयतः सञ्जातम्। महाकाव्येऽस्मिन् विविधेषु छन्दःसु नव सर्गाः विलसन्तितराम्।

प्रथमसर्गे गर्भाधानस्य वर्णनम् अस्ति। अस्मिन् सर्गे ६६ श्लोकाः सन्ति। अस्मिन् सर्गे सरयूनद्याः वर्णनक्रमे सुकवेः लिखति।

सरय्वा रज्वा वा विमलजलमध्यप्लुतवतां
नृणामंहः कृष्टं निखिलमिह जन्मार्जितमपि ।
समं सर्वे सर्वेश्वरहरिपदं प्रापुररै-
र्दुरापं ते भूयः कथमितरथा चक्रिवपुषः ।।१.७

द्वितीये सर्गे धनुर्भङ्गस्य वर्णनम् अस्ति। अस्मिन् सर्गे १०५ श्लोकाः सन्ति। सर्गेऽस्मिन् भगवतः श्रीरामस्य प्राकट्यकथने सुकवेः पदचारुता पाठकान् आह्लादयति।

चौत्रिकेऽथ धवले पुनर्वसौ
शोभनेऽधिनवमि स्त्रिया ग्रहैः ।
पञ्चभिर्नरविगैः श्रितोच्चगै-
ज्येष्ठया प्रसुषुवे सुतो दिने ।।२.१

पद्मपत्रनयनश्चतुर्भुजो जानुलम्बिसुभुजोल्लसद्वपुः
शङ्खचक्रकमलं गदा दधत्
कौस्तुभेन वनमालया लसन्।। २.२

तृतीयसर्गे रामस्य परिणयस्य वर्णनम् अस्ति। अस्मिन् सर्गे ७३ श्लोकाः सन्ति। यदा श्रीरामः शिवस्य धनुं त्रोटितवान् तदा परशुरामः समागतः। तत्र रामेण सह संवादः सञ्जातः। तस्य वर्णनं सुकवेः करोति।

कोऽयं धनुस्त्रोटितवान् शिवस्य
वदाशु मह्यं तममोघवीर्यम् ।। ३.११
तुष्णीं भवन्तं जनकं निरीक्ष्य
विहस्य रामो निजगाद रामम् ।
क्षन्तव्यमेवेति कृतिर्ममेयं
मुने महात्मा खलु शान्तिवृत्तिः।। ३.१२

चतुर्थसर्गे चित्रकूटगमनस्य वर्णनम् अस्ति। अस्मिन् सर्गे १२१ श्लोकाः सन्ति। यदा भगवान् श्रीरामः पितुः वचनं श्रुतवान् तदा सः रामः स्वकीयां भावनां विशदीकृतवान्।

तात ! तातचरणस्य निदेशात्
कालकूटमपि पेयतमं मे ।
किं पुनर्निवसतो वद खेदो
दण्डकादिविपिने सदने वा ।। ४.६८

पञ्चमे सर्गे भरतस्य प्रत्यागमनस्य वर्णनम् अस्ति। अस्मिन् सर्गे ६२ श्लोकाः सन्ति। यदा श्रीमान् भरतः मर्यादापुरुषोत्तमं भगवन्तं श्रीरामं प्रति अगच्छत् तदा द्वयोः भ्रात्रोः संवादः अप्रचलत्। तत्र सुकवेः पदशय्या सर्वथा प्रशंसनीया विद्यते । भरतस्य विषये रामस्य वचनम् अस्ति।

मतिमान्न कुनीतिमान् भवेत् कुमतेः संश्रयणादपि क्वचित् ।
विदितः खलु शीतशीतलः फणिसङ्गादपि चन्दनद्रुमः।।५.४८

षष्ठे सर्गे खरादिवधस्य वर्णनम् अस्ति। अस्मिन् सर्गे ६६ श्लोकाः सन्ति। यदा भगवान् श्रीरामः जटायुना सह वार्ताम् अकरोत् तदा जटायुः स्वपरिचयं भगवते श्रीरामाय प्रदत्तवान्। अत्र कवेः कल्पना अद्भुता अस्ति।

स जटायुराशु रघुनाथमथो वदति स्म तेऽस्मि जनकस्य सखा ।
इति वेदितो रघुवरः पतगं सममामनत् सविनयं पितृतः।। ६.४०

सप्तमे सर्गे वालिवधस्य वर्णनम् अस्ति। अस्मिन् सर्गे १०२ श्लोकाः सन्ति। यदा शूर्पणखा छिन्ननासिकया स्वभ्रातुः रावणस्य सभाम् आगतवती तदा रावणस्य सभायां कीदृशी स्थितिः आसीत्, इत्यस्य चर्चा अत्र उद्घाटिता सुकविना रूपनाथोपाध्यायेन।

दशाननाग्रे पतिता सभायां विकृतानना ।
विलपन्त्यश्रुनयना ज्यायांसमलपच्च सा।।
पानासक्तस्य मूर्खस्य स्त्रीजितस्याल्पमेधसः।
चारचक्षुर्विहीनस्य राज्ञो राज्यं निनश्यति।। ७.६-७

अष्टमे सर्गे सीतादर्शनस्य वर्णनम् अस्ति। अस्मिन् सर्गे ६६ श्लोकाः सन्ति। सर्गस्यादौ प्रकृतिवर्णनक्रमे भगवतः श्रीरामस्य वर्णने सुकवेः शब्दछटा भावपूर्णा सुविद्यते।

अथ गिरौ निवसन् जलदागमे विरहिणां समये विपदागमे।
परिददर्श कबन्धभरं वरे स जलदं जलदच्छविरम्बरे ।। ८.१

नवमे सर्गे श्रीरामाधिरूढसिंहासनस्य वर्णनम् अस्ति। अस्मिन् सर्गे १४६ श्लोकाः सन्ति। रावणः स्वमुखात् स्वसामर्थस्य वर्णनम् अकरोत्। सुकवेः सुललितं पद्यम् अत्यन्तं हृदयावर्हकम् विद्यतेतराम्।

न मे सुरेशादपि पाशिनो न मे न मे कुबेरादपि मे न कालतः।
न वायुतो मे न च वह्नितो भयं न चामरेभ्यः किमु वानरात् नरात् ।। ९.३५

यदा भगवतः श्रीरामस्य राज्यारोहणम् अजायत तदा किं किं जातम् इत्यस्य वर्णने सुकवेः भावविन्यासः सर्वथा श्लाघनीयः अस्ति।

तीर्थौदकैर्विधिसुतादिभिरार्यविप्रैः संहारितैः कपिवरैर्विहिताभिषेकः।
रामो विदेहसुतया सहितो विदेहो भद्रासने वनितयेव बभौ सहायम्।। ९.१३८

अनेन महाकाव्येन रामस्य उदात्तस्य चरितस्य परिचयि जायते। अल्पे एव पत्रे कवेः वचनं प्रामुख्येन उद्घाटितम् । सुकवेः प्रयोगः सरलः न कुत्रापि कठिनशब्दस्य योजना अस्ति। महाकाव्यानुसारेण प्रकृतिवर्णनम् अपि नितरां हृदयापर्हकम् अस्ति।

# उज्जयिन्यां राष्ट्रियकार्यशालायाः समापनम्

डॉ.दिनेश चौबे, उज्जयिनी

नवदेहलीस्थ भारतसर्वकारस्य शिक्षामन्त्रालयस्याधीना भारतीयभाषासमितिः, उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य संस्कृतशिक्षणप्रशिक्षणज्ञान विज्ञानसंवर्धनकेन्द्रम् इत्यनयोः संयुक्ततत्त्वाधाने आयोजिता संस्कृतध्येयवाक्यानां विश्लेषणम् इति विषयिण्याः त्रिदिवसीयराष्ट्रियकार्यशालायाः शनिवासरे



सायंकाले समापनं जातम्। कार्यशालायाः प्रतिवेदनं कार्यशालासंयोजकेन डॉ.अखिलेशकुमारद्विवेदी महोदयेन प्रस्तुतम् समापनकार्यक्रमे अध्यक्षरूपेण उपस्थितेन विश्वविद्यालयस्य कुलपतिवर्येण आचार्यविजय कुमारसीजीमहोदयेन उक्तं यत् एतादृशाः कार्यशालाः सङ्कल्पेन समर्पणेन च सम्पन्नाः भवन्ति। भारतीयभाषासमित्याः उद्देश्यानुगुणम् अस्यां कार्यशालायां विद्वतभिः सस्कृतध्येयवाक्यानां मंथनविश्लेषणपूर्वकञ्च सरलसंस्कृतभाषया, हिन्दी-आङ्ग्ल भाषाभ्याञ्च अनुवादकार्यं सम्पादितम्। महता परिश्रमेण उत्साहेन च सर्वे अत्र भागं गृहीतवन्तः। अस्मिन्नवसरे आचार्यतुलसीदासपारौहामहोदयःविश्वविद्यालयस्य रीवापरिसरप्रभारिः विशेषरुपेण उपस्थितः आसीत्। कार्यशालायां आचार्यः हेमन्तगेहलोतमहोदय; प्राचार्यः ,शासकीयकन्या स्नात्कोत्तरमहाविद्यालयः उज्जयिनीतः श्रीमान्सौरभकुमारः, नवदेहलीतः डॉ. उमाशंकरपुरोहितः, इंदौरतः डॉ. एसटीपीकनकवल्ली, भोपालतः, डॉ.श्रेयस कोरान्ने, श्रीयशशर्मा, शासकीयसंस्कृत महाविद्यालयः उज्जयिनीतः अन्ये विद्वांशः पाणिनिविश्वविद्यालयस्य ये कार्यशालायां संसाधकरूपेण कार्यं संपादितवन्तः। समन्वयकः डॉ.दिनेशचौबेमहोदयः च आसीत्।

# युवदिवसमभिलक्ष्य अखिलभारतीय-भाषणप्रतियोगिता सम्पन्ना

भारतीयज्ञानपरम्परायाः आध्यात्मिकसञ्चेतनायाश्च विश्वसचेतकानां स्वामीविवेकानन्दवर्याणां जन्मजयन्तीमभिलक्ष्य राष्ट्रिययुवदिवसे चातुर्वेद-संस्कृतप्रचार-संस्थानद्वारा अखिलभारतीय-भाषणप्रतियोगिता समनुष्ठिता। 'मानवतासंरक्षणे युवकानां भूमिका' इति विषयमादाय प्रवर्तमानायामस्यां देशस्य विभिन्नेभ्यो विद्यालयेभ्यः १८० छात्राः प्रतिभागं कृतवन्तः। प्रथमस्तरे चयनरूपेण ६६ छात्राः प्रस्तुतीकरणाय चिताः । अन्तिमरूपेण ३६ प्रतिभागीनां प्रस्तुतिर्जाता। सर्वे सोत्साहं सगर्वं युवकानां भूमिकां निरूपितवन्तः। सारांशरूपेण स्वीकुर्मश्चेत् मानवतासंरक्षणे युवकानां भूमिका तथैवास्ति यथा शरीरे मेरुदण्डस्य भवति। युवका समाजस्य, राष्ट्रस्योन्नतिकारकाः भवन्ति। समाजे व्याप्यकुरीतीनां सम्मार्जकाः, दुराचारपापाचारोपशमनसमर्था भवन्तिघ। स्वामी विवेकानन्दः, आजादचन्द्रशेखरः, नेताजीसुभाषचन्द्रप्रभतयो नैके महापुरुषाः अस्माकं युवकानाम्




आरम्भत एव आदर्शभूताः। 'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत' स्वामिनः आह्वानवाक्यं सदा स्मरणीयम् आचरणीयमस्ति। देहं व साधयेयं कार्यं वा पायेयम्, न त्वहं कामये राज्यं न स्वर्गं न पुनर्भवं कामये दुःखतप्तानां प्राणिनामार्तनाशनम्। इति पं.मदनमोहनमालवीयवचनं बहूनामपि यूनां प्रेरणा वर्तते। एवं बहुविधानि सूत्राणि प्रयुञ्जानः प्रतिभागिनः युवकानां भूमिकां व्याख्यातवन्तः। होराचतुष्टयादप्यककालं यावत् प्रचलितायां प्रतियोगितायां दिल्ली, उत्तराखण्ड, गुजरात-आन्ध्र-अरुणाञ्चल-हरियाणा-उत्तरप्रदेश-उत्तराखण्ड-राजस्थानादिप्रदेशेभ्यः सम्मिलिताः आसन। प्रतियोगितेयं चातुर्वेद-संस्कृतप्रचार-संस्थानस्य राष्ट्रियाध्यक्षाणां सम्पूर्णानन्दसंस्कृत विश्वविद्यालयीय-तुलनात्मकध मर्दर्शनाचार्याणां प्रो.हरिप्रसादोधिकारिवर्याणाम् आध्यक्ष्ये सम्पन्ना। निर्णायकरूपेण महत्वपूर्णां भूमिकां निर्वूढवन्तः श्रीकल्याणसेवा आश्रम-मध्यप्रदेशतः स्वामिनः श्रीयोगेश्वरानन्दमहोदयाः, डालमियाविद्यामन्दिरम् झुंझुनू राजस्थानतः डॉ. धर्मेन्द्र तिवारीमहोदयाः, उत्तराखण्डसंस्कृतविश्वविद्यालयीयस्य साहित्यविभागस्य सहायकाचार्याः डॉ. कञ्चनतिवारीमहोदयाः आसन्। अन्ते सर्वेषां सम्बोधनमपि सञ्जातम। वरिष्ठसंरक्षिका लक्ष्मणपुरतः डॉ. नवलता महोदया युवकेभ्यः सारगर्भितं सन्देशं प्रोवाच।

आरम्भे केन्द्रीयसंस्कृतविश्वविद्यालयस्य लक्ष्मणपुरपरिसरस्य शिक्षाशास्त्रिच्छात्रा अनन्या श्रीवास्तवा मङ्गलाचरणं कृतवती। सञ्चालनं, संयोजनम् आभारज्ञापनञ्च सहायकाचार्यः राजकीयस्नातकोत्तरमहाविद्यालयस्य सहायकाचार्यः डॉ. चन्द्रकान्तदत्तशुक्लः अकरोत्। अवसरेस्मिन् अनेके विद्वांसः सहृदयाः आमन्त्रिताः तेषु डॉ. गीता शुक्ला, डॉ. अरविन्दकुमारतिवारी, डॉ. अखिलेश्वरपाण्डेयः, डॉ. अवनीन्द्रपाण्डेयः, डॉ. सचिनदेवद्विवेदी, डॉ. नेहा मिश्रा, डॉ. सन्ध्या ठाकुर, अरुणाचलतः श्रीमान् पंकजकुमारः, दिल्लीतः श्रीमान् नारायणः, डॉ. जगदीशनारायणतिवारी, डॉ. शशिभूषणमिश्रः, डॉ. खगेन्द्रमिश्रः, डॉ. आभा द्विवेदी, डॉ. रामप्रियशर्मा, डॉ. सरोजपाण्डेयः, डॉ. विकासद्विवेदीप्रभृतयः समुपस्थिता आसन्। सर्वस्यापि कार्यक्रमस्य सजीवप्रसारणं 'विश्वसंस्कृतकुटुम्बकम्' इत्याख्ये आमुखपटले समूहेभूत्।

# रक्षामंत्री श्रीराजनाथसिंहः स्थापितवान् पतंजलिगुरुकुलस्य आधारशिलाम्

हरिद्वारम्। पतंजलि योगपीठस्य 29तमे स्थापना दिवसं पतंजलि योगपीठ महर्षि दयानन्द सरस्वत्याः 200तमां जयन्तीं गुरुकुल ज्वालापुर संस्थापकस्य पूज्य स्वामिदर्शनानन्दस्य जयन्तीं च आलक्ष्य देशस्य



माननीय रक्षा मंत्री श्री राजनाथ सिंहः विश्वस्य श्रेष्ठतम गुरुकुल 'पतंजलि गुरुकुलम्' देशस्य श्रेष्ठतम शिक्षण संस्थान आचार्यकुलस्य नवीन शाखाशिलान्यासं कृतवान् तेनोक्तं यत् स्वामी रामदेवस्य दिशानिर्देशने संचालित पतंजलि गुरुकुलम् भारतीय संस्कृति व सनातन ध्वजवाहकं विनिर्मास्यते। भारतीय संस्कृति जीविता सनातनी च तिष्ठेत्, इत्यत्र देशस्य गुरूणां महद्योगदानं विद्यते। 1500 वर्षेभ्यः पूर्व नालंदा, तक्षशिला विश्वविद्यालयः अपि गुरुकुलीय परम्परायाः श्रेष्ठम् उदाहरणम् अस्ति।

कार्यक्रमे स्वामी रामदेवः कथितवान् यत् पतंजलि गुरुकुलं सनातनस्य ध्वजवाहकम्। यत् पूर्णे विश्वस्मिन् भारतीय संस्कृतिं प्रचारयति प्रसारयति च ।पतंजलि योगपीठस्य महामंत्री आचार्यो बालकृष्णोऽभाषत यत् श्रद्धेय स्वामी तपसा पुरुषार्थेन च संस्था इयं स्वीय-अतीतस्य गौरवं समेत्य वैभव प्राप्स्यति।

मध्य प्रदेशस्य मुख्यमंत्री श्री मोहन यादवः कथितवान् यत् त्रेतायां मर्यादा पुरुषोत्तम भगवान रामः द्वापरे योगेश्वर कृष्णः गुरुकुल शिक्षां गृहीतवन्तौ । स्वामी रामदेव तामेव गौरवशालिनी गुरुकुलीय परम्परां संवाहयति। अस्माभिः गुरुकुलीय परम्परायै गौरवं प्रदाप्प्यते । अथ च नवशिक्षा नीतिमाध्यमेन भविष्यसंततये भारतीय संस्कृत्या सह युक्ता भवेमेति संकल्पः स्वीकृतः। उत्तराखण्डस्य यशस्विना माननीय मुख्यमंत्रिणा पुष्कर सिंह धामिना कथितं यत् गुरुकुलम् एकः विशिष्ट शब्दः यत्र गुरुः शिष्यान् कुलवाहकान् मत्वा शिक्षांप्रदाय तेषां मार्गं प्रशस्तीकरति। स्वामी रामदेवः महाराज महर्षि दधिचिरिव स्वीयं सर्वस्वं देशस्य समाजस्य च सेवायां समर्पयति। कार्यक्रमे केन्द्रीय मंत्री श्री अर्जुन राम मेघवालः, राज्यसभा सांसद श्री सुध ांशु त्रिवेदी, एमिटी समूहस्य अध्यक्षः डॉ. अशोक चौहानः, बाबा बालकनाथ महाराजः, लक्ष्मण गुरुः, अखाड़ा परिषद अध्यक्ष स्वामी रविन्द्रपुरी महाराजः, महामण्डलेश्वरः स्वामी हरिचेतनानंदः स्वामी यतीश्वरानंदः, श्री सत्यपालः, श्री धनसिंह रावतः, श्री रमेश पौखरियालः 'निशंक', श्री शोभित गर्गः, श्री मदन कौशिकः, श्री प्रणव सिंहः 'चौम्पियन', श्री राकेश टिकैतः, श्री सुरेश चन्द्र आर्यः, आचार्य स्वदेशः, श्री विनय आर्यः, श्री दयानंद चौहानः, स्वामी आर्यवेशः, आचार्या सुमेशा, आचार्या सुकामा, श्री सुशील चौहानः, स्वामी सम्पूर्णानंदः इत्येतैः सहिताः आर्य समाजस्य प्रायः समेऽपि गणमान्य विद्वांसः, भजनोपदेशकाः संन्यासी महापुरुषाः, हरिद्वारस्य समे पूज्य आचार्य महामण्डलेश्वराः संत महात्मनः, गुरुकुल ज्वालापुरस्य महासभायाःप्रबंधकारिणी सभायाः च समस्त अधिकारिणः सदस्यगणः पतंजलिना सम्बद्धाः एकांशिकाप्रमुखाः, अधिकारिणः, कर्मचारिणः संन्यासिनः भ्रातरः भगिन्यश्च उपस्थिताः आसन्।

# संस्कृतध्येयवाक्यविश्लेषणमिति राष्ट्रियकार्यशालायाः आयोजनम्

डॉ.दिनेश चौबे, उज्जयिनी

नवदेहलीस्थ भारतसर्वकारस्य शिक्षामन्त्रालयस्याधीना भारतीयभाषासमितिः, उज्जयिनीस्थ महर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य संस्कृतशिक्षणप्रशिक्षणज्ञान विज्ञानसंवर्धनकेन्द्रम् इत्यनयोः संयुक्ततत्त्वाधाने



चतुर्तमेदिनाङ्के प्रातः सार्धदशवादने गुरुवासरे विश्वविद्यालयस्य योगेश्वरश्रीकृष्ण भवने संस्कृतध्येयवाक्यानां विश्लेषणम् इति विषयिण्याः त्रिदिवसीयराष्ट्रियकार्यशालायाः उद्घाटनम् अभवत्। विश्वविद्यालयस्य देवासमार्गस्थे परिसरे समारोहस्य शुभारम्भः वाग्देव्याः सरस्वत्याः समर्चनेन, दीपदीपनेन च जातः। तदनु

शेषभागःषोडशपुटे

# श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालये महर्षिवर्याणां श्रीजगदीशनारायणब्रह्मचारिमहोदयानां त्रयोदशपुण्यस्मृतिः समनुष्ठिता

नवदेहली। श्रीजगदीशवेदोद्यानसौरभम् इत्यनया संज्ञया संगठितेनैकेन समूहेन बिहारप्रान्तस्थ द्वारबंगमण्डलान्तर्गतताडडीहप्रखण्डस्य लगमाग्रामे जगदीशनारायण- चतसृणां शिक्षणसंस्थानानां ब्रह्मचर्याश्रमस्यान्यासाञ्च संस्थापकानां साकेतसञ्चारिणाम्महर्षिवर्याणां त्रयोदशपुण्यस्मृतौ वि.सं.-२०८० पौषकृष्णचतुर्थ्यां शनिवासरे तदनुसारं ३०-१२-२०२३ तमे दिनाङ्के तच्छिष्यैः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयपरिसरे महोत्सवरूपस्य कार्यक्रमस्यानुष्ठानं विहितम्। कार्यक्रमस्य शुभारम्भो विश्वविद्यालयस्य छात्रावासीयपरिसरे प्रातः १० वादनात् यज्ञाचार्यश्रीउदयनाथझोपाह्वानां निर्देशने गोस्वामितुलसीदासविरचितश्रीरामचरित-मानसस्थसुन्दरकाण्डपाठेनाभवत। तदनन्तरं १२ वादनाद्विद्यावाचस्पतिः डा०सुन्दरनारायणझोपाह्वानां निर्देशने गुरुकुलेभ्यः समागतैर्वटुभिः ऋग्यजुस्सामथर्वाणां चतुर्णामपि वेदानां सस्वरपारायणपाठोऽभवत्। वेदपारायणपाठदृश्यम् - अपराह्न २ वादनाद्वेदमन्त्रान्त्याक्षरीप्रतियोगिता समारब्धा। तत्राध्यक्ष्यपदं वास्तुशास्त्रविभागाध्यक्षेण छात्रावासप्रबन्धसमित्यध्यक्षेण प्रो० देवीप्रसादत्रिपाठिवर्येण निर्यूढम्। कार्यक्रमस्य शुभारम्भः समागतैरतिथिभिर्दीपप्रज्वालनेन वैदिकमङ्गलाचरणेन चाभवत्।

आसु प्रतियोगितासु भागग्रहणाय देहलीप्रान्तस्य श्रीनिवाससंस्कृतविद्यापीठम् गुरुकलात्, नेहरूनगरवेदविद्यालयात्, मंडावलीवेदविद्यालयगुरुकुलात्, आरामबागवेद- विद्यालयगुरुकुलात्, फरीदाबादस्थितवेदविद्यालयगुरुकुलात्, बक्करवालावेदविद्यालय- गुरुकुलात्, रघुवीरनगरवेदविद्यालयात्, वसन्तगाँववेदविद्यालयात्, श्रीलालबहादुरशास्त्री- राष्ट्रियसंस्कृतविश्वविद्यालयाच्च बहवः प्रतिभागिनः समागत्य भागं गृहीतवन्तः। तत्र प्रो० महानन्दझाः, निर्णायकाः प्रो० देवेन्द्रप्रसादमिश्रः, डॉ०ओङ्कारयशवन्तसेलूकरमहोदयाश्चासन्। चित्राणि- प्रतियोगिता-समाप्त्यनन्तरं महाराजजीनां शिष्यवर्णैः स्वीयं-स्वीयमनुभवं प्रस्तुतम्। सर्वेषामपि प्रतिभागिनां प्रस्तुतिरुत्तमाऽसीत् अन्ते चतुर्णां वटुकानाम्मध्ये तादृशी प्रतिस्पर्द्धासीद्यत्तत्र निर्णयः कठिनोऽभवदतश्चत्वारोऽपि प्रथमस्थाने चिताः। जहांगीरपुरीवेदविद्यालयगुरुकुलस्य श्रीलाबशारासंविश्वविद्यालयस्य विष्णुपाण्डेयः, रुद्रपाण्डेयः, आरामबागवेदविद्यालयस्य दक्षः, आदित्यनारायणपचौरी च प्रथमस्थानाय चिताः। पुरस्कारग्रहणचित्रम्-

सार्द्धचतुर्वादनादारभ्य समारोपसमारोहः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य समारब्ध स्तत्राध्यक्षा अस्माकं कुलगुरवः प्रो० मुरलीमनोहरपाठकमहोदया आसन्। मुख्यातिथित्वेन श्रीलालबहादुरशास्त्रीराष्ट्रिय- संस्कृतविश्वविद्यालयस्य शिक्षासङ्कायस्य सङ्कायप्रमुखचराः प्रो०



नागेन्द्रझामहोदयाः, भारतसर्वकारस्य भारतीयराजस्वसेवातो निवृत्ताः विशिष्टातिथित्वेन परमोच्चपदाधिकारिणो विविधसंस्थानां निदेशकाश्च श्रीप्रकाशचन्द्रझावर्याः, सारस्वतातिथित्वेन वास्तुशास्त्रविभागाध्यक्षाः उत्तराखण्डसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतयश्च विविधोच्चपदमण्डिताः प्रो० देवीप्रसादत्रिपाठिमहोदयाश्च समाहूता आसन्। कार्यक्रमसंयोजकेन विद्यावाचस्पतिना प्रो० सुन्दरनारायणझावर्येण प्रावारक- मैथिलोष्णीष (पाग)-पुष्पमाल्येन चोपस्थितान् ब्रह्मचारिशिष्यानाहूय मञ्चासीनानाम- तिथीनां स्वागतं विधाय वाचिकं स्वागतं च सम्पाद्य कार्यक्रममारब्धम्। चित्राणि-श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्यपूर्वस्नातकेन डा०सन्तोष- कुमारझोपावेन शैक्षिकानुसन्धानं नैतिकनिर्णयश्चेति शीर्षकमादाय संस्कृतगिरा विरचितस्य ग्रन्थरत्नस्य लोकार्पणकार्यक्रमः समनुष्ठितस्सर्वैरपि मंचासीनैर्विद्वद्भिरिति महान् संतोषस्य विषयः । तच्चित्रं यथा-अस्मिन्नेवावसरे जगद्गुरुरामानन्दाचार्य श्रीमद्विजयरामाचार्यविरचितस्य श्रीमच्चतुर्भुजाचार्यचरणचञ्चरीक- श्रीराममहिमस्तोत्रस्य डॉ० कृष्णकान्तझाकृत हिन्द्यनुवादस्य प्रो० सुन्दरनारायणझाकृतरोमन्लिप्यन्तरसहितसम्पादितस्य प्रकाशितस्य लघुग्रन्थस्य सम्मानितैरतिथिभिर्लोकार्पणं विहितम्। तच्चित्रं यथा- विश्वविद्यालयस्य दैवज्ञप्रवरेण प्रो० फणीन्द्रकुमारचौधरीवर्येण समागतानामतिथीनां धन्यवादज्ञापनं कृतम्। सामूहिकशान्तिपाठेन कार्यक्रमस्य समारोपो विहितः, अन्ते च सामूहिकेन भण्डाराप्रसादग्रहणेन कार्यक्रमः रात्रौ १२ वादने सम्पन्नताङ्गतः। भण्डाराचित्राणि-एवमुक्तप्रकारेण समस्तोऽपि कार्यक्रमः श्रीमन्महाराजजीनामाशिषा मनोरमतया सुसम्पन्नः। ये चास्माकमतिथयस्ते शीताधिक्यात्कष्टानि सोढ्वाऽपि समागत्य कार्यक्रमेऽस्मिन् समुपस्थायास्माकं गौरवं वर्धितवन्तस्तस्मात्तेभ्यः प्रणतिपुरस्सरमाधमर्ण्यं

व्यक्तीकरोमि । अत्र महाराजशिष्याः पण्डितप्रवरश्रीरमाकान्तझाः, डा. गोपालकुमारझाः, श्रीराजेशकुमारझाः, श्रीविद्याशङ्करझाः, श्रीश्रवणकुमारझा अन्ये च सहयोगिनो यथा डा०रमेशमिश्रः, जयप्रकाशझा, डा०प्रदीपकुमारझा, श्रीकालीकान्तझा, श्रीप्रमोदझा (बड़काबौआ), श्रीकामेश्वरचौधरी, श्रीसत्येन्द्रकुमारझा, डा.रतीशकुमारझाः, श्रीसिंटूकुमारझा, श्रीदयाकान्तचौधरी, श्रीसोहनजीचौधरी, श्रीयोगेशकुमारः, श्रीप्रत्यूषकुमारः, श्रीत्रिपुरारिझा, श्रीसोनू, छायाचित्रकारः श्रीरविभूषणचौधरी, श्रीअमितकुमार इत्यादयः सर्वेऽपि छात्रावासीयच्छात्रा मदीयान्तेवासिनश्च कार्यकर्तारः पूर्णमनोयोगेन कार्यक्रममिमं सम्पादितवन्तस्तेभ्यः सर्वेभ्योऽपि भूयांसि धन्यवादवचांसि । इति शम् ।

पञ्चदशपुटस्य शेषभागः

## संस्कृतध्येयवाक्यविश्लेषणमिति....

वैदिकमङ्गलाचरणम्, सरस्वतीवन्दना विश्वविद्यालयस्य कुलगानञ्च अवभत्। अथितिनां स्वागतं विश्वविद्यालयस्य कुलपतिवर्येण, कुलसचिवमहोदयेन च् कृतवन्तौ । कार्यशालायाः प्रस्तावना, वाचिकस्वागतम्, अतिथिपरिचयः च कार्यशालासंयोजकेन डॉ.अखिलेशकुमारद्विवेदी महोदयेन विहितम्।

कार्यक्रमे मुख्यातिथिरूपेण विराजमानेन विक्रमविश्व विद्यालयस्य कुलपतिवर्येण अखिलेशकुमारपांडेयमहोदयेन उक्तं यत् संस्कृतं ज्ञान-विज्ञानस्य भाषा वर्त्तते संस्कृते निहितं ज्ञानविज्ञानम् अत्यन्तं पुरातनं लोकोपकारकम् अस्ति संस्कृतस्य विज्ञानस्य च समन्वयेन भारतं पुनः विश्वगुरुः भवितुं शक्यते। संस्कृते महत्त्वपूर्णज्ञानराशिः उपनिबद्धो वर्त्तते। अस्याः महिम्नः सर्वेपि परिचिताः सन्ति। कार्यक्रमस्य अध्यक्षः विश्वविद्यालयस्य माननीयः कुलपतिः आचार्यः विजयकुमारसीजीमेनन्महोदयः आसीत् । महोदयेन उक्तं यत् संस्कृतग्रन्थेषु नानाविधाविष्काराः तत्त्वरूपेण निहिताः वर्त्तन्ते। अतः संस्कृतम् अवश्यं पठनीयम्। आधुनिककाले अपि संस्कृतभाषाप्रयोगस्य अनिवार्यता अनुभूयते। भारतं नानाभाषाभिः समृद्धराष्ट्रं वर्त्तते। संस्कृतं तासां भाषाणां मुकुटमणिः अस्ति। संस्कृते निहितानां भाषावैज्ञानिकानां तत्वानाम् अन्वेषणमन्वरतं भारते जायमानम् अस्ति। भारतस्य सर्वा भाषाः संस्कृतात् उद्भूताः अनुप्राणिताः च सन्ति। कार्यशालायामस्यां भारतीयभाषासमित्याः उद्देश्यानुगुणं सस्कृतध्येयवाक्यानां सरलसंस्कृतभाषया, हिन्दी- आङ्ग्ल भाषाभ्याञ्च संसाधकैः अनुवादकार्यं सम्पादितम्।

कार्यक्रमस्य सञ्चालनं समन्वयकेन डॉ.दिनेशचौबेमहोदयेन, आभारप्रदर्शनं कुलसचिवेन डॉ. दिलीपसोनीमहोदयेन कृतम् ।कार्यक्रमैस्मिन् विश्वविद्यालयस्य सर्वे विभागाध्यक्षाः आचार्याः, छात्राः, शोधच्छात्राः, नगरस्य गणमान्यजनाः, पत्रकाराश्च उपस्थिताः आसन्। अन्तिमे कल्याणमन्त्रेण सह सभा समाप्ता।




अस्माकं प्रेरणास्त्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,
अतिथि-सम्पादकः: डॉ.विमलेन्दुकुमारत्रिपाठी

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स 521/8 बी, भूतलं, वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।